मध्य सिद्धान्त कौमुदी

डॉ॰ सुरेशचन्द्र शास्त्री

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

१८५

श्रीवरदराजाचार्यविरचिता

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्याद्वयोपेता

(आदितः-अव्ययप्रकरणान्तः प्रथमो भागः)

व्याख्याकार

श्रीसुरेशचन्द्र शर्मा

व्याकरणाचार्य, एम० ए०, पी-एच० डी०

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ५७२१४

प्रथम संस्करण १९९१

मूल्य ३५-००

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए. बंगलो रोड, जवाहरनगर

पो० बा० नं० २११३

दूरभाष : २३६३९१

*

प्रधान वितरक

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ६३०७६

मुद्रक

श्रीजी मुद्रणालय

वाराणसी

THE
CHAUKHAMBA SURBHARATI GRANTHAMALA
185

MADHYASIDDHĀNTA-KAUMUDĪ

OF

ŚRĪ VARADARĀJĀCĀRYA

(Part 1 : Avyayaprakarananta)

Edited with
'Subodhini'-Sanskrit & Hindi Commentaries

By
Shri Suresh Chandra Sharma
Vyakaranacharya, M. A., Ph. D.

CHAUKHAMBA SURBHARATI PRAKASHAN
VARANASI

निवेदनम्

विदितमेव तत्रभवतां श्रीमतां यत्संस्कृतवाङ्मयज्ञानाय व्याकरणमेव मुख्यं साधनम्। ऐन्द्रचान्द्रादिषु नैकेषु व्याकरणेषु सत्स्वपि सर्वत्राधुना पाणिनीय-व्याकरणमेव प्रचलति। तच्च व्याकरणं लक्ष्यलक्षणात्मकम्। तत्र शब्दो हि लक्ष्यः, लक्षणन्तु सूत्रम्। अनयोः सम्यग्ज्ञानार्थं पाणिनीयाष्टाध्याय्या अध्ययनं परमावश्यकम्। अतः 'अष्टाध्यायी'ति ग्रन्थस्य गूढाभिप्रायं ज्ञातुं काशिकादि-वृत्तिग्रन्थानां पठनपाठनयोः परम्परा प्रचलिता। परिवर्तनशीलेऽस्मिन् युगेऽध्य-यनाध्यापनविधावपि परिवर्तनं स्वाभाविकमेव। अत एव सरलरीत्या व्याकरण-शास्त्रज्ञानाय अष्टाध्यायीक्रमस्यकाठिन्यनिवारणाय च प्रक्रियाक्रमस्यारम्भो जातः। रूपावताराद्‌दुद्गतेयं प्रक्रियापरम्परा रूपमालया प्रक्रियाकौमुद्या च पल्लविता, सिद्धान्तकौमुद्या च पुष्पिता तत्रैव पर्यवसिताऽपि। श्रीमद्भट्टोजि-दीक्षितविदुषा विरचिता वैयाकरणसिद्धान्तकौमुदी प्रौढा पाण्डित्यपरिपूर्णा च वर्तते। अतः सकुमारमतीनां बालानां प्रवेशोऽत्र दुष्कर इति विचार्य तच्छिष्येण पण्डितप्रवरेण वरदराजाचार्येण प्राथमिकाध्येतॄणां बालानामनायासेन बुद्धिप्रवेश-लाभाय लघुसिद्धान्तकौमुदी, लब्धकिञ्चित्प्रवेशानां माध्यमिकानाञ्च बालानां व्याकरणशास्त्रबोधसम्पत्तये मध्यसिद्धान्तकौमुदी विरचिता।

सेयं मध्यसिद्धान्तकौमुदी स्वल्पेन कालेन बहुबोधाधायनीति विदन्त्येव विद्वांसः। ग्रन्थस्यास्य परमोपादेयतामभिलक्ष्य कैश्चिद्विश्वविद्यालयैः माध्यमिक-कक्षासु विनिर्धारितोऽयं ग्रन्थः। यद्यप्यद्यत्वे मध्यसिद्धान्तकौमुद्याः संस्कृत-हिन्दीव्याख्योपेतानि नैकानि संस्करणानि प्रकाशितानि सन्ति। परं 'विद्यार्थि-जनोपयोगि सरलटीकोपेतं किञ्चित्संस्करणं नैव समुपलभ्यते' इत्यभावमनुभवता चौखम्बासुरभारतीप्रकाशनाध्यक्षस्याग्रहवशंवदेन छात्रहितैषिणा मया 'सुबो-धिनी'ति संस्कृत-हिन्दीव्याख्योपेतायाः मध्यसिद्धान्तकौमुद्याः प्रथमो भागः प्रकाश्यते। कार्येऽस्मिन् व्याकरण-साहित्य-वेदान्ताद्यनेकशास्त्रमर्मविदुषां व्याकरणविभागाध्यक्षाणां पूज्यगुरुवर्याणां श्रीमतां केशवदेवतिवारीमहाभागानां हार्दिकीमधमर्णतामावहामि, यैरत्यन्तवात्सल्यभावेन पदे पदे काठिन्यं निरस्या-स्माकं साहाय्यं कृतम्। अत्र कियत्साफल्यमधिगतं मयेत्यत्र तु विद्वांसः प्रेक्षका एव प्रमाणम्। प्रमादेनात्र काश्चन त्रुटयः स्युस्ताः संशोध्य विद्वद्भिः सूचनीयो-ऽप्ययं जन इति शम्।

विदुषामाश्रवः—
सुरेशचन्द्र शर्मा

भूमिका

संस्कृत भाषा भारत की ही नहीं, अपितु विश्व की प्राचीनतम भाषा है। सभ्यता के उषाकाल में इस भाषा का उदय हुआ और सर्वप्रथम भारत को ही इस उदय के दर्शन का श्रेय प्राप्त हुआ। 'वेद संसार के प्राचीनतम ग्रन्थ हैं' यह सभी विद्वानों और ऐतिह्यविदों ने स्वीकार किया है।

किसी भी भाषा की सुरक्षा और उसका मौलिक ज्ञान उसके व्याकरण में निहित होता है। बिना व्याकरण के भाषा प्रायः विश्रृंखल और अपूर्ण रहती है। संस्कृत-वाङ्मय में व्याकरणशास्त्र का विशिष्ट स्थान है। 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्।' अर्थात् जिससे साधु शब्दों का ज्ञान होता है, उसे **'व्याकरण'** की संज्ञा से अभिहित किया जाता है। महाभाष्यकार ने इसी को **'शब्दानुशासन'**[1] भी कहा है। शिक्षा, कल्प, व्याकरण, निरुक्त, छन्द और ज्योतिष—इन षडङ्गों में व्याकरण वेद का मुख रूप प्रधान अङ्ग माना जाता है। जैसा कि पाणिनीय शिक्षा में कहा गया है—

'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्॥'[2]

भगवान् पतञ्जलि ने भी कहा है—**'प्रधानं च षडङ्गेषु व्याकरणम्।'**[3]

व्याकरण-वाङ्मय में ऐन्द्र व्याकरण सबसे प्राचीन है। शब्दोपदेश के लिए प्रकृति-प्रत्यय विभाग की कल्पना सर्वप्रथम सुरगुरु बृहस्पति के शिष्य इन्द्र ने की थी। देवराज इन्द्र से लेकर महर्षि पाणिनि पर्यन्त[4] अनेक आचार्यों ने व्याकरणशास्त्र का निर्माण किया था, परन्तु आज पाणिनीय व्याकरण ही सर्वाङ्ग परिपूर्ण उपलब्ध होता है। यद्यपि यह संस्कृत के प्राचीन आर्ष

---

१. 'अनुशिष्यन्ते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दा अनेनेत्यनुशासनम्, शब्दानामनुशासनं शब्दानुशासनं सूत्रवार्तिकभाष्यव्याख्यानादिरूपं शास्त्रम्।'

२. पाणिनीय शिक्षा (४१, ४२)।

३. महाभाष्यम् (पस्पशाह्निकम्)।

४. बोपदेव ने इन्द्र आदि आठ वैयाकरणों का उल्लेख किया है—

'इन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥' (कविकल्पद्रुमः)

व्याकरणों में सबसे अन्तिम और संक्षिप्ततम है; तथापि लौकिक और वैदिक दोनों प्रकार के संस्कृत-वाङ्मय को आलोकित करने वाला एक महान् प्रकाश-स्तम्भ है। विश्व की किसी भी भाषा का व्याकरण इतना सरल और परिष्कृत नहीं बन सका है। संसार के सभी विद्वानों ने इसकी वैज्ञानिकता की मुक्तकण्ठ से प्रशंसा की है। पाणिनीय व्याकरण का मूलग्रन्थ भगवान् पाणिनि की 'अष्टाध्यायी' है। इसमें ३९९५ सूत्र हैं।[1] इस अष्टाध्यायी के माध्यम से उन्होंने संस्कृत भाषा के परिष्कृत रूप को स्थायित्व प्रदान किया। कालान्तर में महर्षि कात्यायन ने 'अष्टाध्यायी' की समीक्षा करते हुए उसके पूरक के रूप में वार्तिकग्रन्थ की रचना की। सूत्र तथा वार्तिकों के पारस्परिक समन्वय को समझाने के लिए शेषावतार भगवान् पतञ्जलि ने विशद विवरणात्मक ग्रन्थ 'महाभाष्यम्' की रचना की। उन्होंने पूर्ववर्ती दोनों आचार्यों की रचनाओं में सत्यान्वेषण किया और सिद्धान्ततः निष्कर्ष प्रस्तुत किया, जिससे विद्वानों ने उनके सिद्धान्तों को विशेष मान्यता प्रदान की—'यथोत्तरं मुनीनां प्रामाण्यम्।' इस प्रकार सूत्रकार 'पाणिनि', वार्तिककार 'कात्यायन' और भाष्यकार 'पतञ्जलि' ये तीनों आचार्य व्याकरण के 'त्रिमुनि' कहलाते हैं।

पाणिनि

महर्षि पाणिनि के जन्मस्थान, जन्मकाल आदि के विषय में इतिहासकार एकमत नहीं हैं। 'त्रिकाण्डशेष' कोष में पाणिनि के छह नामों का उल्लेख मिलता है। पाणिन, आहिक, दाक्षीपुत्र, शालङ्कि, पाणिनि और शालातुरीय। इन नामों द्वारा इनके गोत्र, माता-पिता तथा देश का निर्णय किया जा सकता है। इनमें पाणिन और पाणिनि दोनों नाम गोत्र-व्यपदेशज हैं। कुछ विद्वानों का मत है कि 'आहिक' इनका मूल नाम है। इनकी माता का नाम दाक्षी था, अतः इनका एक नाम दाक्षीपुत्र भी है। महाभाष्यकार पतञ्जलि का कथन है—'सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः।' कुछ गवेषकों के अनुसार इनके पिता का नाम शलङ्क था। अतः इनको 'शालङ्कि' कहा गया। 'शालातुरीय' नाम इनके जन्मप्रदेश को स्पष्ट करता है। 'गणरत्नमहोदधि' नामक ग्रन्थ में 'शालातुरीय' की व्युत्पत्ति इस प्रकार की गई है—**'शलातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयस्तत्रभवान् पाणिनिः।'** इससे स्पष्ट होता है कि पाणिनि का जन्मस्थान 'शलातुर' नामक ग्राम ही है, जो वर्तमान

---

१. 'चतुःसहस्री सूत्राणां पञ्चसूत्रविवर्जिता।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैः सह॥'

(स्वरसिद्धान्तचन्द्रिका, श्लो० १५)

में 'लाहौर' नाम से प्रसिद्ध है और पाकिस्तान का विशाल नगर है। इनकी प्रारम्भिक शिक्षा सम्भवतः तक्षशिला में हुई थी, पश्चात् अपने ज्ञान की अभिवृद्धि के लिए यह अन्यत्र चले गये। इनके गुरु का नाम उपवर्षाचार्य था, जो नालन्दा विश्वविद्यालय के सुप्रसिद्ध आचार्य कहे जाते थे। इन्होंने अपने अध्ययन काल में ही कठिन तपस्या करके आशुतोष भगवान् शङ्कर को प्रसन्न किया और उनके उपदेश से 'अष्टाध्यायी' नामक व्याकरणशास्त्र की रचना की। महर्षि पाणिनि की वन्दना में आचार्यों ने कहा भी है—

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥'

महर्षि पाणिनि के काल के सम्बन्ध में इतिहासकारों के भिन्न-भिन्न मत हैं। अष्टाध्यायी के 'कुमारः श्रमणादिभिः' (२।१।७०) सूत्र में 'श्रमण' पद प्रयुक्त हुआ है। इससे आलोचक पाणिनि को बुद्धकालीन अथवा तत्पश्चात्कालीन सिद्ध करते हैं। इसी प्रकार कुछ विद्वान् 'इन्द्रवरुण०' (४।१।४९) सूत्र में 'यवन' पद को देखकर इन्हें 'सिकन्दर' के समकालीन स्वीकार करते हैं। परन्तु यह नितान्त भ्रमपूर्ण है। क्योंकि वैदिक ब्राह्मणग्रन्थों में भी श्रमण पद का उल्लेख मिलता है।[1] इसी प्रकार सिकन्दर के भारतागमन से भारतीय लोग यवनों से परिचित हुए। यह भी भ्रम ही है, क्योंकि महाभारत में यवन सैनिकों के द्वारा युद्ध करने का प्रसङ्ग है।

पं० युधिष्ठिर मीमांसक का मत है कि पाणिनि विक्रम से २८०० वर्ष पूर्व हुए हैं। किन्तु भाण्डारकर और गोल्डस्टुकर ने पाणिनि का समय ५०० ई० पू० से पहले निश्चित किया है। इसी प्रकार भारतीय और पाश्चात्य मतों पर सम्यग् विचार करने के उपरान्त डॉ० वासुदेव शरण अग्रवाल ने पाणिनि का समय ५०० ई० पू० निश्चित किया है।[2]

कात्यायन

पाणिनि की 'अष्टाध्यायी' पर आवश्यकतानुसार अनेक आचार्यों ने वार्तिकग्रन्थ लिखें थे। उनमें महामुनि कात्यायन का प्रमुख स्थान है। पाणिनीय व्याकरण को सम्पूर्ण एवं समृद्ध बनाने के लिए कात्यायन का विशेष महत्त्व

---

१. 'अत्र पिता अपिता भवति, माता अमाता, लोका अलोकाः, देवा अदेवाः, श्रमणोऽश्रमणः, तापसोऽतापसः।'

(शतपथब्राह्मण)

२. द्रष्टव्य—श्रीवासुदेवशरण अग्रवाल : 'पाणिनिकालीन भारतवर्ष'। (पृ० ४७०–४८०)

है । पाणिनि और कात्यायन समकालीन और सतीर्थ्य थे । इनका कात्यायन नाम गोत्रज है । आपका मूल नाम 'वररुचि' था । महाभाष्य के प्रथमाह्निक में 'यथा लौकिकवैदिकेषु' इस वार्तिक पर 'प्रियतद्धिता दाक्षिणात्याः, यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते ।' इस पतञ्जलि-वचन से विदित होता है कि ये दाक्षिणात्य थे । ये केवल वार्तिककार ही नहीं अपितु महाकवि भी थे । इनके 'स्वर्गारोहण' नामक काव्य की प्रशंसा अनेक ग्रन्थों में है । यथा—

'यः स्वर्गारोहणं कृत्वा स्वर्गमानीतवान् भुवि ।
काव्येन रुचिरेणैव ख्यातो वररुचिः कविः ॥'

महाभाष्यकार पतञ्जलि

इस समय पाणिनीय व्याकरण पर पतञ्जलि-विरचित एक ही भाष्य ग्रन्थ उपलब्ध होता है । यह विशालकाय होने से महाभाष्य के नाम से प्रसिद्ध है । भाष्य का तात्पर्य निम्नाङ्कित है—

'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥'

महामुनि पतञ्जलि एवं उनके महाभाष्य की सभी विद्वानों ने मुक्तकण्ठ से प्रशंसा की है । उनका महाभाष्य न केवल व्याकरणशास्त्र का ही प्रामाणिक ग्रन्थ है, अपितु अनेक विषयों का आकर ग्रन्थ है । इस ग्रन्थ की भाषा यद्यपि अत्यन्त सरल है, तथापि कहीं-कहीं भाव-गाम्भीर्य अत्यधिक है ।

भगवान् पतञ्जलि ने मनोवाक्कायदोषनिरसनार्थ 'योगसूत्र', 'महाभाष्य' और 'चरकसंहिता' इन तीन विश्वप्रसिद्ध ग्रन्थों की रचना की, जैसा कि किसी विद्वान् ने भगवान् पतञ्जलि की स्तुति करते हुए कहा है—

'योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।
योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥'

महाभाष्यकार पतञ्जलि ने अपने परिचय के विषय में कुछ नहीं लिखा है । किन्तु 'महाभाष्य' में कुछ स्थलों पर 'गोर्नदीयस्त्वाह' तथा 'गोणिकापुत्रः' लिखा गया है । इससे ज्ञात होता है कि यह गोर्नद प्रदेश के निवासी थे । यह गोर्नद प्रदेश कहाँ है ? इस पर आधुनिक विद्वान् गोण्डा जनपद को ही गोर्नद मानते हैं । इनके महाभाष्य में 'पुष्यमित्रो यजते, इह पुष्यमित्रं याजयामः' इत्यादि प्रयोग मिलते हैं । इससे प्रतीत होता है कि ये राजा पुष्यमित्र के समकालिक थे । पुष्यमित्र का समय ईसा की द्वितीय शताब्दी निश्चित किया गया है । भारतीय पौराणिक गणना के आधार पर पं० युधिष्ठिर जी मीमांसक ने पतञ्जलि का समय विक्रम से १२०० वर्ष पूर्व निश्चित किया है ।

पाणिनीय व्याकरण के ये तीनों आचार्य 'त्रिमुनि' के नाम से प्रसिद्ध हैं। आशुतोष भगवान् शंकर के डमरू से पाणिनि के चतुर्दशसूत्र प्राप्त हुए और उन्हीं सूत्रों के आधार पर उन्होंने अष्टाध्यायी की रचना की। उसकी पूर्ति के लिए कात्यायन ने वार्तिकों की रचना की और भगवान् शेषावतार पतञ्जलि ने जिज्ञासु विद्यार्थियों और मनीषियों के हितार्थ 'महाभाष्य' का प्रवचन किया। ये तीनों व्याकरणशास्त्र के प्रवर्तक है।

अष्टाध्यायी के टीकाकार

पाणिनीय व्याकरण के मूल ग्रन्थ 'अष्टाध्यायी' पर अनेक वृत्तिग्रन्थ लिखे गये। वृत्तिकारों में श्वोभूति, व्याडि, कुणि, माथुर, वररुचि आदि प्रमुख हैं। परन्तु इस समय उपलब्ध वृत्तिग्रन्थों में वामन और जयादित्य द्वारा विरचित 'काशिकावृत्ति' अत्यन्त सराहनीय है। इसका निर्माणकाल विद्वानों ने वि० सं० ६५०-७०० के मध्य स्वीकार किया है।

इस प्रकार अध्येता को सर्वप्रथम सम्पूर्ण 'अष्टाध्यायी' कण्ठस्थ करके प्रयोग के लिए 'काशिका' का अध्ययन करना होता था। अनन्तर विशेष-ज्ञानार्थ महाभाष्य पढ़कर ही विशिष्ट पाण्डित्य प्राप्त होता था।

प्रक्रिया-क्रम

प्रौढ एवं विशेष परिश्रम न करने वाले विद्यार्थियों को उक्त प्रणाली में कष्ट और गौरव का अनुभव होने लगा था। अतः सरलरीति से व्याकरण-शास्त्र के ज्ञान के लिए तथा अष्टाध्यायी-क्रमस्थ कठिनाई को दूर करने के लिए सर्वप्रथम बौद्धमतावलम्बी धर्मकीर्ति ने वि० सं० १३०० में 'रूपावतार' नामक प्रक्रिया-ग्रन्थ की रचना की। पश्चात् विमलसरस्वती ने 'रूपमाला' और पं० रामचन्द्राचार्य ने 'प्रक्रियाकौमुदी' की रचना की। किन्तु इन प्रक्रिया-ग्रन्थों में अष्टाध्यायी के समस्त सूत्रों का सन्निवेश नहीं था। इस न्यूनता की पूर्ति के लिए म० म० श्रीभट्टोजि दीक्षित ने 'वैयाकरण सिद्धान्त-कौमुदी' की रचना की। विद्वानों ने भट्टोजि दीक्षित का समय वि० सं० १५०० से १५७५ के मध्य स्वीकार किया है। उक्त ग्रन्थ अष्टाध्यायी के समस्त सूत्रों सहित उणादिसूत्र, फिट्सूत्र, लिङ्गानुशासन, गणपाठ और धातु-पाठ से सर्वाङ्गपरिपूर्ण है। यह ग्रन्थ इतना उपयोगी सिद्ध हुआ कि सम्पूर्ण भारतवर्ष में पाणिनीय व्याकरण का अध्ययन इसी के द्वारा होने लगा। 'सिद्धान्तकौमुदी' पर अनेक टीकाएँ लिखीं गयीं, जिनमें दीक्षित जी की प्रौढ-मनोरमा, ज्ञानेन्द्र सरस्वती की तत्त्वबोधिनी, वासुदेव दीक्षित की बाल-मनोरमा तथा नागेश का लघुशब्देन्दुशेखर प्रसिद्ध है।

आचार्य वरदराज

आचार्य वरदराज दाक्षिणात्य पण्डित थे। इनके पिता दुर्गातनय और गुरु भट्टोजिदीक्षित थे। अपने अध्ययन के पश्चात् इन्होंने पाणिनि-व्याकरण में प्रवेशार्थी सुकुमार मति वाले बालकों के लिए 'सिद्धान्तकौमुदी' का पथ-प्रदर्शक 'लघुसिद्धान्तकौमुदी' नामक ग्रन्थ की रचना की। वरदराज का यह लघु प्रयास प्रारम्भिक छात्रों के लिए परमोपयोगी है।

मध्यसिद्धान्तकौमुदी

इस प्रकार 'लघुकौमुदी' द्वारा साधारण ज्ञान प्राप्त हो जाने पर विद्यार्थियों की ज्ञानवृद्धि के लिए वरदराज ने द्वितीय सोपान रूप 'मध्य-सिद्धान्तकौमुदी' का प्रणयन किया। मध्यसिद्धान्तकौमुदी के अन्त में वरद-राज ने कहा है—

'कृतिर्वरदराजस्य मध्यसिद्धान्तकौमुदी।
तस्याः सङ्ख्या तु विज्ञेया खबाणकरवह्निभिः॥'

यह किवदन्ती है कि आचार्य वरदराज की इस कृति को देखकर गुरुवर भट्टोजिदीक्षित को सन्देह हो गया था कि मध्यकौमुदी को पढ़ने के पश्चात् मेरी 'सिद्धान्तकौमुदी' को कौन पढ़ेगा? क्योंकि सिद्धान्तकौमुदी का सार-सर्वस्व मध्यसिद्धान्तकौमुदी है।

इस ग्रन्थ में सिद्धान्तकौमुदी की अपेक्षा संक्षेप के अतिरिक्त प्रकरण-क्रम में भी भिन्नता है। वाक्य में सर्वप्रथम अर्थज्ञान के लिए पदच्छेद अपेक्षित होता है। अतः पूर्व में सन्धि-प्रकरण को रखा गया है। अनन्तर सुबन्त पदों के ज्ञान के लिए षड्लिङ्ग-प्रकरण और अव्यय-प्रकरण का संघटन किया गया है। इसके बाद स्त्रीप्रत्यय की अपेक्षा तिङन्त पदों के ज्ञान के लिए तिङन्त-प्रकरण का विन्यास सर्वथा उचित है। क्योंकि स्त्रीप्रत्यय कृत्तद्धित-समास के बाद ही अपेक्षित है। अतः अन्त में 'स्त्री-प्रत्यय' का होना ही उचित है। इसी प्रकार कारक का भी समास से पूर्व होना युक्तिसङ्गत प्रतीत होता है। क्योंकि विभक्त्यर्थज्ञान पर ही समास-प्रक्रिया आधारित है।

मध्यसिद्धान्तकौमुदी की एक अत्यन्त प्राचीन टीका 'मध्यमनोरमा' है; ऐसा कुछ विद्वानों ने स्वीकार किया है। परन्तु इसका मुद्रित संस्करण अद्यावधि अप्राप्य ही है।

आजकल मध्यसिद्धान्तकौमुदी के संस्कृत-हिन्दी टीकाओं सहित अनेक संस्करण निकल रहे हैं। उनमें पं० सदाशिव शास्त्री की 'सुधा' संस्कृत व्याख्या तथा पं० रामचन्द्र झा द्वारा रचित 'इन्दुमती' हिन्दी टीका का प्रमुख स्थान रहा है।

प्रस्तुत संस्करण में 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या का संक्षेप में वर्ण्यविषय-इस प्रकार है—संस्कृत में जिज्ञासु छात्रों को सूत्रार्थ समझाना ही उद्देश्य रहा है। हिन्दी में प्रत्येक सूत्र का पदच्छेद, अनुवृत्ति तथा सूत्रभेद प्रदर्शित कर विद्यार्थियों को सूत्रार्थ समझने की ओर स्वतः उन्मुख होने की प्रणाली बतलायी गई हैं। अनन्तर ग्रन्थ की 'वृत्ति' के अनुसार सूत्रार्थ किया गया है। 'विमर्श' में अनुवृत्त सूत्रों का उल्लेख करते हुए सूत्रस्थ पदों के साथ उनका सम्बन्ध प्रदर्शित कर सूत्रार्थ स्पष्ट किया गया है। प्रक्रियानुसार क्रम से उदाहरणों की सिद्धि की गई है और प्रत्युदाहरणों के द्वारा सूत्रस्थ पदों की सार्थकता दिखलायी गई है। प्रसङ्गवश कठिन स्थलों का स्पष्टीकरण भी किया गया है। नवीन प्रकरणों के आरम्भ में पूर्वापर सङ्गति उपक्रम के रूप में की गई है। इसके अतिरिक्त अन्य ज्ञातव्य तथ्यों का प्रतिपादन किया गया है।

प्रस्तुत संस्करण की व्याख्या के विषय में गुण-दोषों का विवेचन सुधी पाठकजन ही करेंगे। मेरे प्रमाद एवं अज्ञानवश कुछ त्रुटियाँ हुई होंगी। अतः नीर-क्षीर-विवेकी विद्वानों से निवेदन है कि वे उन्हें सुधारकर सूचित करने का कष्ट करें। आशा एवं विश्वास है कि 'मध्यसिद्धान्तकौमुदी' के इस संस्करण से छात्रगण अवश्य ही लाभ उठायेंगे।

शिवरात्रि, २०४६ वि० }

विदुषां वशंवदः
सुरेशचन्द्र शर्मा

प्रकरण-सूची

॥ श्रीः ॥

मध्यसिद्धान्तकौमुदी

'सुबोधिनी'-संस्कृत-हिन्दीव्याख्योपेता

अथ संज्ञाप्रकरणम्

नत्वा वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् ।
करोति पाणिनीयानां मध्यसिद्धान्तकौमुदीम् ॥

'श्रीसरस्वत्यै नमः'

श्रीगणेशं नमस्कृत्य साम्बं विश्वेश्वरं परम् ।
बालानां सुखबोधाय सुबोधिनीयं विरच्यते ॥

अन्वयः—वरदराजः श्रीगुरून् भट्टोजिदीक्षितान् नत्वा पाणिनीयानां मध्यसिद्धान्तकौमुदीं करोति ।

'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युः' इति भाष्यादिसिद्धप्रतिपादितकर्तव्यताकं ग्रन्थादौ मङ्गलमाचरन् वैयाकरणो वरदराजः 'गुरुः साक्षात्परं ब्रह्म' इत्युक्तिं हृदि निधाय श्रीगुरून् प्रणम्य चिकीर्षितं प्रतिजानीते—**नत्वेति** । वरदराजः =मध्यसिद्धान्तकौमुदीप्रणेता, श्रीगुरून्—श्रिया=निखिलशास्त्रज्ञानरूपया शोभया, सहिताः श्रीसहिताः, ते च गुरवः—गृणन्त्युपदिशन्तीति गुरवस्तान्=सच्छास्त्रोपदेशकानिति यावत्, भट्टोजिदीक्षितान्=शब्दकौस्तुभ-सिद्धान्तकौमुदी-मनोरमादिग्रन्थकर्तॄन्

प्रकृत ग्रन्थ 'मध्यसिद्धान्तकौमुदी' के आरम्भ में ग्रन्थकार वरदराजभट्टाचार्य शिष्टों की परम्परा का अनुसरण कर, अपने ग्रन्थ की निर्विघ्न परिसमाप्ति हेतु मङ्गलाचरण प्रस्तुत करते हैं ।

मूलार्थ—मैं वरदराज पदवाक्यप्रमाणज्ञानरूप शोभा से युक्त अपने गुरु श्रीभट्टोजिदीक्षित को प्रणाम करके पाणिनिमुनि रचित व्याकरणशास्त्र में प्रवेश हेतु मध्यसिद्धान्तकौमुदी को बनाता हूँ ।

विमर्श—'गुरुः साक्षात्परं ब्रह्म, नास्ति तत्त्वं गुरोः पदम्' इत्यादि शिष्ट व्यवहार से विदित है कि ज्ञानदाता गुरु का सर्वश्रेष्ठ स्थान है, वही परमपदार्थ है । अतः ग्रन्थकार ने आरम्भ में विघ्नों के विनाश हेतु गुरुनमस्कारात्मक मङ्गल प्रस्तुत किया है ।

किसी ग्रन्थ के अध्ययन में अध्येताओं की प्रवृत्ति के लिए अनुबन्धचतुष्टय अर्थात् विषय, अधिकारी, सम्बन्ध और प्रयोजन का निरूपण करना आवश्यक होता है । अतः इस प्राचीन परम्परा का अनुसरण करते हुए प्रकृत ग्रन्थ मध्यसिद्धान्तकौमुदी के मङ्गलाचरण श्लोक में भी 'अनुबन्धचतुष्टय' की कल्पना की गई है ।

अइउण् ।१। ऋऌक् ।२। एओङ् ।३। ऐऔच् ।४। हयवरट् ।५। लण् ।६। ञमङणनम् ।७। झभञ् ।८। घढधष् ।९। जबगडदश् ।१०। खफछठथचटतव् ।११।

(बहुवचनमत्रादरार्थम्), नत्वा = प्रणम्य, अञ्जलिशिरःसंयोगादिव्यापारेण तोषयित्वेति भावः। पाणिनीयानाम्—पाणिनिना प्रोक्तं पाणिनीयं (व्याकरणशास्त्रम्), तदधीयते विदन्ति वेति पाणिनीयास्तेषां पाणिनीयानाम्, मध्यसिद्धान्तकौमुदीम्—सिद्धः = निष्पन्नः, अन्तः = निर्णयो येषान्ते सिद्धान्तास्तेषां कौमुदीव कौमुदी—कौमुद्या अर्थप्रकाशकत्वधर्मेण चन्द्रिकयाऽत्र साम्यमिति भावः, मध्या=लघुकौमुद्यादिवन्नात्यल्पा, सिद्धान्तकौमुदीवच्च नातिविस्तीर्णा; चासौ सिद्धान्तकौमुदी मध्यसिद्धान्तकौमुदी—'पुंवत्कर्मधारय०' (६।३।४२) इत्यनेन पुंवद्भावः'; ताम्, करोति = विरचयति।

मङ्गलाचरणोऽनुबन्धा अपि निवेशनीया भवन्ति। यथोक्तमभियुक्तैः—

'विषयश्चाधिकारी च सम्बन्धश्च प्रयोजनम्।
विनानुबन्धं ग्रन्थादौ मङ्गलं नैव शस्यते ॥'

ग्रन्थाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वमनुबन्धसामान्यलक्षणम्। अत एवात्रापि 'पाणिनीयानां मध्यसिद्धान्तकौमुदीम्' इति कथनेनानुबन्धाः सूचिताः। पाणिनीयानामर्थाद् वैयाकरणानां सिद्धान्तज्ञानं विषयः। तज्जिज्ञासुरधिकारी, अन्ये त्वधीत-

---

(१) विषय का अभिप्राय है—किसी शास्त्र या ग्रन्थ की प्रतिपाद्यवस्तु। यहाँ वैयाकरण सिद्धान्तज्ञान प्रस्तुत ग्रन्थ का विषय है।

(२) जिस कार्य के लिए मनुष्य स्वयं को योग्य (अधिकारी) समझता है; उसी में उसकी प्रवृत्ति होती है। यह अधिकारिता मुख्यतया दो बातों पर निर्भर होती है, प्रथम—इष्टसाधनता, द्वितीय—कृतिसाध्यता। 'इदं मदिष्टसाधनम्' अर्थात् जिसमें उसे अपने उद्देश्य की सिद्धि में सफलता मिले तथा इसके साथ यह भी आवश्यक है 'इदं मत्कृतिसाध्यम्' अर्थात् वह उस कार्य को करने में समर्थ भी है। इस प्रकार ग्रन्थाध्ययन में प्रवृत्ति के लिए इष्टसाधनता और कृतिसाध्यता का ज्ञान आवश्यक होने से अधिकारी भी अनुबन्ध माना गया है। यहाँ वैयाकरणमध्यसिद्धान्त का जिज्ञासु अधिकारी है।

(३) सम्बन्धज्ञान अध्येता की प्रवृत्ति के लिए आवश्यक होने से सम्बन्ध भी अनुबन्ध है। ग्रन्थ का प्रतिपाद्य-प्रतिपादकभाव सम्बन्ध है।

(४) 'प्रयुङ्क्ते प्रयोजयति वा प्राधान्येन यत्तत्प्रयोजनम्' इस व्युत्पत्ति के अनुसार प्रयोजन का अर्थ है—प्रधानप्रवर्त्तक। अध्येता को जब तक ग्रन्थ के प्रतिपाद्य विषय के ज्ञान की उपयोगिता की जानकारी नहीं होती, तब तक उस ग्रन्थ के अध्ययन में उसकी प्रवृत्ति नहीं होती। इस प्रकार अध्येता की प्रवृत्ति के लिए विषय का ज्ञान आवश्यक होने से विषयज्ञान का प्रयोजन भी अनुबन्ध माना गया है। प्रकृत ग्रन्थ का प्रयोजन प्रकृतिप्रत्ययादिविभाग से शब्द-निष्पादन है।

अक्षरसमाम्नाय के द्योतक अइउण् इत्यादि १४ सूत्र भी प्रत्याहारों की सिद्धि में 'आदिरन्त्येन सहेता' के साथ एकवाक्यता होने से सूत्र कहे गये हैं। इस प्रकार शक्तिनियामकत्व होने के कारण इनको संज्ञासूत्र भी कहते हैं।[1]

---

१. "एषां क्रमबोधकत्वेऽपि 'आदिरन्त्येन सहेता' इत्यनेनैकवाक्यतया वृत्तिपरिच्छेदकत्वेन संज्ञासूत्रत्वम्" (ल० श० शे०)

कपय् ।१२। शषसर् ।१३। हल् ।१४। इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ।

काव्यकोषादिद्विजातिरधिकारीति वदन्ति । प्रतिपाद्यप्रतिपादकभावः सम्बन्धः । अनायासेन तदवगमः प्रयोजनम् ।

अ इ उ ण् इति । वर्णानां स्पष्टप्रतिपत्तये संहिताया अविवक्षणादेतेषु अ इ उ इत्यादिष्वसन्धिः । सौत्रत्वान्नैतेभ्यो विभक्त्युत्पत्तिः । यद्वा स्वराणां चादिषु पाठात् 'चादयोऽसत्त्वे' इति निपातसंज्ञायां 'निपात एकाजनाङ्' इति प्रगृह्यत्वात् प्रकृतिभावः । ननु अकारादिवर्णेभ्यो 'वर्णात्कारः' इत्यनेन कारप्रत्ययः स्यादिति चेन्न, 'रोगाख्यायां ण्वुल् बहुलमि'त्यतोऽनुवृत्तबहुलग्रहणसामर्थ्यात् । न च 'एओङ्, ऐऔच्' इत्यत्र स्थान-प्रयत्नसाम्ये सावर्ण्यं स्यादिति वाच्यम्; 'एओङ्, ऐऔच्' इति पृथक्सूत्रपाठात् । **लणिति ।** ननु 'अइउण्' इत्यत्र णकारानुबन्धेनैवाणादिप्रत्याहारसिद्धौ पुनः लणित्यत्र णकारानुबन्धग्रहणं व्यर्थमिति न शङ्क्यम्, 'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादि-लक्षणम्' इति परिभाषया तस्य साफल्यात् । तथा च व्याख्यानम्—

'परणैवेण्ग्रहाः सर्वे पूर्वेणैवाऽण्ग्रहा मताः । ऋतेऽणुदित्सवर्णस्येत्येतदेकं परेण तु ॥'

इति = इमानि चतुर्दशसूत्राणि, माहेश्वराणि = महेश्वरादागतानि माहेश्वराणि, 'तत आगतः' इत्यण् । महेश्वरप्रसादप्राप्तानीत्यर्थः । तदुक्तं पाणिनीयशिक्षायाम्—

'अइउण्, ऋऌक्, एओङ्, ऐऔच्' इन चार सूत्रों में सन्धिकार्य की प्रवृत्ति वर्णों की स्पष्ट प्रतीति के कारण नहीं होती । अन्यथा सन्धि हो जाने पर वर्णों की पृथक्ता को व्याख्यान आदि के द्वारा सूचित करना पड़ता । अथवा अ इ उ इत्यादि स्वरों का चादिगण में पाठ होने से 'चादयोऽसत्त्वे' से निपातसंज्ञा हो जानेपर 'निपात एकाजनाङ्' सूत्र से प्रगृह्यसंज्ञा होकर प्रकृतिभाव होने से सन्धि नहीं होती । अकारादि वर्णों से बाहुलकात् 'वर्णात्कारः' से कारप्रत्यय भी नहीं होता ।

यहाँ ए तथा ऐ का कण्ठतालु स्थान और विवृत प्रयत्न साम्य होने से एवम् ओ तथा औ वर्णों का कण्ठोष्ठ स्थान और विवृत प्रयत्न समान होने से सवर्ण संज्ञा होकर 'एओङ्, ऐऔच्' इन दो सूत्रों के स्थान पर एक ही सूत्र से काम चल सकता था ? ऐसी शङ्का की जाती है । इसका निराकरण यह है कि पाणिनि ने 'एओङ्, ऐऔच्' ये दो सूत्र पृथक् पढ़े हैं । अतः ए ऐ तथा ओ औ वर्णों की परस्पर सवर्ण संज्ञा नहीं होती ।

वर्णसमाम्नाय में 'ण्' अनुबन्ध[1] का पाठ दो सूत्रों में किया गया है, प्रथम तो 'अइउण्' सूत्र में, दूसरा 'लण्' सूत्र में । अतः अण् और इण् प्रत्याहारों में यह शङ्का उत्पन्न होती है कि णकार से पूर्व 'ण्' का ग्रहण किया जाय अथवा पर (दूसरे) 'ण्' का ग्रहण किया जाय ? इस शंका का समाधान व्याख्यान के द्वारा किया जाता है कि 'अणुदित्सवर्णस्य चाप्रत्ययः' (१।१।६९) सूत्र में तो अण् प्रत्याहार पर-णकार तक स्वीकार किया जाय; अन्यत्र सभी जगह पूर्व-णकार तक । इण् प्रत्याहार पर-णकार से ही ग्राह्य है ।

मूलार्थ—ये १४ माहेश्वर सूत्र अण्, अक्, अच् इत्यादि संज्ञाओं (प्रत्याहारों) की सिद्धि के लिए हैं । इन १४ (चौदह) सूत्रों के अन्तिम वर्ण (ण् क् ङ् च् ट् आदि) इत्संज्ञक होते हैं ।

---

१. इत्संज्ञकत्वम् इत्संज्ञायोग्यत्वम् वानुबन्धत्वम् । अनु पश्चात् बध्यते युज्यते इति अनुबन्धः । जो बाद में जोड़े जाये वे अनुबन्ध कहे जाते हैं । ये अनुबन्ध इत्संज्ञा सदृश होते हैं ।

'येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।' इति ।

नन्वेषां माहेश्वरसूत्राणां वैयाकरणसिद्धान्तप्रकाशने उपयोगाभावादिह तदुपन्यासो व्यर्थं इत्यत आह—अणादिसंज्ञार्थानीति । अण् आदिर्यासां ताः अणादयः=अक्, अच्, अल्, हल् इत्यादिसंज्ञारूपप्रत्याहाराः, अणादयश्च ताः संज्ञा अणादिसंज्ञाः, ताः अर्थः प्रयोजनं येषां तानि अणादिसंज्ञार्थानि । कथमेषां सूत्राणामणादिसंज्ञार्थत्वमित्यत आह—**एषामन्त्या इत** इति । एषां चतुर्दशसूत्राणामन्त्ये भवा अन्त्याः 'दिगादिभ्यो यदि'त्यनेन यत्प्रत्ययः, णकारादिवर्णा इत्संज्ञका भवन्तीत्यर्थः । **हकारादिष्विति ।** सुकरतयोच्चारणार्थमेव हकारादिष्वकारोच्चारणं कृतम्, अन्यथा ह्य्वर् इत्येवं क्लिष्टोच्चारणापत्तेरिति भावः । अथवा अचं विना हलामुच्चारणाभावात् पुनः पुनरकारपाठो हकाराद्युच्चारणार्थ इत्यवगन्तव्यम् । यथोक्तम्—'उच्चैरुदात्तः' इति सूत्रस्थभाष्ये—'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति ।

ननु 'उरण् रपरः' इत्यत्र रप्रत्याहारेण रलयोर्ग्रहणार्थं रप्रत्याहारसिद्धिरा-

---

(अर्थात् उनका लोप होता है, शास्त्रप्रवृत्ति में उनका उपयोग नहीं होता है ।) हकार इत्यादि व्यञ्जन वर्णों में अकार उच्चारण की सुविधा के लिए है । परन्तु 'लण्' सूत्र में अकार की इत्संज्ञा होती है । इत्संज्ञा होने से उसका भी लोप हो जाता है ।

विमर्श—अ इ उ ण् इत्यादि चौदह सूत्र 'माहेश्वरसूत्र' कहे जाते हैं । इस वर्णसमूह का परिचय महर्षि पाणिनि को महेश्वर (भगवान् शंकर) की कृपा से प्राप्त हुआ है । इस सम्बन्ध में एक किंवदन्ती प्रचलित है कि—पाणिनि अपने गुरु वर्षाचार्य के गुरुकुल में विद्याध्ययन करते थे । अध्ययन के समय अपनी प्रतिभा का समुचित विकास होते हुए न देखकर अत्यन्त खिन्न रहा करते थे । वर्षाचार्य के ही शिष्य कात्यायन प्रखरप्रतिभासम्पन्न थे । अपने सहाध्यायी कात्यायन से शास्त्रार्थ में पराजित होकर पाणिनि ने भगवान् शंकर की आराधना की । जिसके परिणामस्वरूप उन्हें शिव के डमरू-निनाद से वर्णसमाम्नाय (१४ सूत्रों) की प्राप्ति हुई ।[1] इस प्रकार अपने आराध्य भगवान् शिव से वरदान के रूप में प्राप्त शब्दों की चतुर्दश सूत्रों में कल्पना कर महर्षि पाणिनि ने बड़े वैज्ञानिक ढंग से स्वर-व्यञ्जन विभाग किया है । इन चौदह सूत्रों से प्रत्याहारों की कल्पना द्वारा शास्त्र का निरूपण करने में परम लाघवहुआ है । ये प्रत्याहार इस व्याकरणशास्त्र में अत्यन्त उपयोगी हैं । प्रत्याहार का अर्थ है—संक्षिप्त कथन[2] । इस प्रकार अनेक वर्णों का ज्ञान संक्षेप में हो जाने से व्यवहार में सरलता हो जाती है । जैसे अच् और हल् प्रत्याहारों से क्रमशः स्वर और व्यञ्जन वर्णों का ज्ञान सुगमता से हो जाता है । अतः इन चौदह माहेश्वर-सूत्रों को प्रत्याहार सूत्र भी कहा गया है ।

अण्, अक्, अच् आदि संज्ञा करना इन १४ सूत्रों का प्रयोजन है । इन सूत्रों के अन्तिम व्यञ्जन वर्ण की इत्संज्ञा होती है । इत्संज्ञक वर्ण का लोप होने से प्रत्याहारों में इन (ण् क् ङ् इत्यादि) व्यञ्जनवर्णों का समावेश नहीं किया जाता । प्रत्याहारों के निर्माण में इन इत्संज्ञक वर्णों की उपयोगिता है, जो उनके नामों में सार्थक दृष्टिगोचर होती है ।

---

१. 'नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धानेतद् विमर्शे शिवसूत्रजालम् ।।' (नन्दिकेश्वर कृत काशिका)

२. 'प्रत्याह्रियन्ते सङ्क्षिप्यन्ते वर्णाः यत्र स प्रत्याहारः ।'

हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।
अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥

(१) हलन्त्यम् १।१।३ । उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् ।

वश्यकी, सा च लण्सूत्रस्थाकारस्येत्संज्ञां विना न सम्भवतीत्यत आह—**लण्मध्ये त्वित्संज्ञकः** । अत्र मानञ्च 'लपरत्वं वक्ष्यामी'ति भाष्यमेव । 'लण्' इति सूत्रेऽकार इत्संज्ञको न तूच्चारणमात्रार्थः ।

अन्वयः—अयं हकारः अटि शल्यपि वाञ्छता द्विरुपात्तः, अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ।

अटि शल्यपीति । अट् प्रत्याहारे शलप्रत्याहारे च हकारस्य ग्रहणं स्यादित्येतदर्थं हयवरडित्यत्र 'हल्' इत्यत्र च हकारोऽयं द्विरुपात्तः=द्विवारं पठितः । अटि हकारस्य प्रयोजनमाह—**अर्हेणेति** । 'अट्कुप्वाङ्नुमि'ति सूत्रेणाड्व्यवायेऽपि णत्वम् । शलि पाठस्य फलमाह—**अधुक्षदिति** । 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशः ।

(१) हल् प्रथमान्तम्, अन्त्यं प्रथमान्तम् । पदद्वयं सूत्रम् । 'उपदेशेऽजनुनासिक इत्' इत्यस्मात् पूर्वसूत्रादुपदेश इति इदिति चानुवर्तते । तदाह—**उपदेशेऽन्त्यमित्यादिना** । अथ कोऽयमुपदेश इत्यत आह—**उपदेश आद्योच्चारणमिति** । उपशब्दोऽत्र आद्यर्थकः, दिशिरुच्चारणक्रियायाम् । आद्यञ्च तदुच्चारणञ्चेत्याद्योच्चारणम्=प्रथममुच्चारणमित्यर्थः, तच्च प्रत्यासत्त्या मुनित्रयस्यैव । केचित्तु—

'हयवरट्' इत्यादि सूत्रों के हकारादि वर्णों में अकार उच्चारण की सुविधा के लिए है । क्योंकि स्वरों की सहायता के बिना व्यञ्जनों का स्पष्ट उच्चारण नहीं हो पाता । किन्तु 'लण्' सूत्र के मध्य में (लकारोत्तरवर्ती) अकार इत्संज्ञक है । इसके साथ ही 'लण्' सूत्रस्थ अकार को अनुनासिक माना जाता है । क्योंकि अच्=स्वर वर्णों के इत्संज्ञाविधायक[1] सूत्र में सानुनासिक अच् की इत्संज्ञा स्वीकार की गई है । माहेश्वर-सूत्रों में अन्तिम व्यञ्जन वर्णों के अतिरिक्त इस लकारोत्तरवर्ती अकार की इत्संज्ञा का प्रयोजन 'र' प्रत्याहार की सिद्धि है । अन्तिम इत्संज्ञक अकार के साथ 'हयवरट्' सूत्रस्थ र् को आदि वर्ण मानकर मध्यवर्ती ल् और आदि वर्ण र् का ग्रहण होने से र प्रत्याहार बनता है । इस प्रकार इस 'र' प्रत्याहार में र् और ल् दोनों वर्णों का समावेश होता है । फलतः आगे 'अच् सन्धि' प्रकरण में 'उरण् रपरः' (१।१।५१) सूत्र के सहकार से अवर्ण और ऌकार को गुण एवं वृद्धि क्रमशः 'अल्' और 'आल्' होते हैं । अन्यथा र प्रत्याहार-सिद्धि के अभाव में ऋ और ऌ की परस्पर सवर्ण संज्ञा होने से 'रपर' केवल अर् तथा आर् ही होता ।

अट् प्रत्याहार और शल् प्रत्याहार में हकार का ग्रहण हो, इसलिए माहेश्वर सूत्रों में दो बार 'ह्' का पाठ किया गया है । 'अट्' प्रत्याहार में हकार का समावेश हो जाने से 'अर्हेण' में 'अट्कुप्वाङ्नुम्०' से णत्व हो जाता है तथा 'शल्' प्रत्याहार में हकार का समावेश होने से 'अधुक्षत्' में 'शल इगुपधात्०' सूत्र से च्लि के स्थान पर 'क्सः' आदेश हो जाता है ।

(१) **पद**—हलन्त्यम् । **अनुवृत्ति**—उपदेशे इत् । **संज्ञासूत्र** ।

मूलार्थ—उपदेश अवस्था में विद्यमान जो अन्त्य हल् (व्यञ्जन वर्ण), उसकी इत्संज्ञा होती है । व्याकरणशास्त्र के प्रवर्तक पाणिनि, कात्यायन, पतञ्जलि आदि आचार्यों का प्रथम उच्चारण

---

१. 'उपदेशेऽजनुनासिक इत्' (१।३।२) ।

सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र । (२) अदर्शनं लोपः १।१।६० । प्रसक्त-स्यादर्शनं लोपसंज्ञं स्यात् । (३) तस्य लोपः १।३।९ । तस्येतो लोपः स्यात् । णादयो-

---

'धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम् ।
आगमप्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥' इत्याहुः ।

(२) अदर्शनं प्रथमान्तम्, लोपः प्रथमान्तम् । शास्त्रतोऽर्थतश्च प्रसक्तस्य = प्राप्तोच्चारणस्यादर्शनम् = श्रवणाभावः, लोप इत्यर्थः ।

(३) तस्य षष्ठ्यन्तम्, लोपः प्रथमान्तम्, तस्य = इत्संज्ञकस्येत्यर्थः । णादयो-

---

'उपदेश' कहा जाता है । जो पद सूत्रों में नहीं देखे गये हैं, उनको दूसरे सूत्रों से सब जगह अनुवर्तन कर लेना चाहिए ।

विमर्श—प्रत्याहारसूत्रों द्वारा स्वर-व्यञ्जन वर्णों का विभाग करने के पश्चात् प्रत्याहार सिद्धि का उपक्रम किया जा रहा है । कार्यों की सुगमता के लिए पाणिनीय सूत्रों को छः भागों में विभक्त किया गया है—संज्ञा, परिभाषा, विधि, नियम, अतिदेश और अधिकार ।[1]

'हलन्त्यम्' इत्संज्ञाविधायक सूत्र है । यहाँ 'उपदेशेऽजनुनासिक इत्' सूत्र से अनुवृत्त 'उपदेशे, इत्' तथा सूत्र में विद्यमान 'अन्त्यं, हल्' पदों की एकवाक्यता होने पर 'उपदेशेऽन्त्यं हल् इत्' इस प्रकार बोध होता है ।

प्रकृत में 'उपदेश' पद का अर्थ आद्य उच्चारण है । यहाँ 'आद्य' शब्द पाणिनि, कात्यायन और पतञ्जलि तीनों मुनियों के अर्थ में रूढ है । अतः अज्ञात वर्णों के स्वरूप-ज्ञान के लिए तीन मुनि द्वारा उच्चरित को उपदेश कहते हैं । प्राचीन आचार्यों ने आद्योच्चारण को धातु, सूत्र, गण, उणादि, लिङ्गानुशासन, आगम, प्रत्यय और आदेश के रूप में स्वीकार किया है । काशिकाकार के अनुसार 'शास्त्रवाक्य' ही उपदेश हैं और वे सूत्रपाठ तथा खिलपाठ के अन्तर्गत समाविष्ट किये गये हैं । सूत्रपाठ से पाणिनि की 'अष्टाध्यायी' और खिलपाठ से धातु, गण, उणादि तथा लिङ्गा-नुशासन का ग्रहण किया जाता है ।

इस प्रकार 'हलन्त्यम्' सूत्र से उपदेश में अन्तिम व्यञ्जन वर्ण की इत्संज्ञा सिद्ध हुई ।

(२) पद—अदर्शनं लोपः । **संज्ञासूत्र** ।

मूलार्थ—विद्यमान वस्तु के अदर्शन = न दिखलायी पड़ने को लोप कहते हैं ।

विमर्श—यहाँ प्रसङ्गतः लोपसंज्ञा का विवेचन किया जा रहा है ।

सूत्र में संज्ञा—लोप और संज्ञी—अदर्शन है । यहाँ अदर्शन शब्द का अर्थ श्रवणाभाव और उच्चारणाभाव के रूप में स्वीकार किया गया है । इस प्रकार प्रसक्त = शास्त्रतः, अर्थतः विद्यमान = प्राप्तोच्चारण का जो अदर्शन, वह लोपसंज्ञक होता है, अर्थात् उस अभाव को लोप कहते हैं ।

(३) पद—तस्य, लोपः । **अनुवृत्ति**—इत् । **विधिसूत्र** ।

---

१. कम शब्दों में किसी बात का स्पष्ट वर्णन करना सूत्र का प्रयोजन होता है—

'अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति सूत्रलक्षणम् ।
'संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥'

'तत्र नामकरणं संज्ञा । अनियमे नियमकारिणी परिभाषा । कर्तव्यत्वेन निर्देशो विधिः । प्राप्त-विधिनियामकं नियमः । अतस्मिन् तद्धर्मापादकम् अतिदेशः । उत्तरप्रकरणव्यापी अधिकारः ।'

ऽणाद्यर्थाः । (४) आदिरन्त्येन सहेता १।१।७१ । अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथा अण् इति अ इ उ वर्णानां संज्ञा । एवमच्, हल्, अल् इत्यादयः । (५) ऊकालोऽज्झ्रस्वदीर्घप्लुतः १।२।२७ । उश्च ऊश्च ऊ ३ श्च वः । वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् । सः प्रत्येकमुदात्तादिभेदेन

ऽणाद्यर्था इति । अण् आदिर्येषान्तेऽणादयस्तेऽर्थाः प्रयोजनं येषान्तेऽणाद्यर्थाः । णादयः =वर्णसमाम्नाये पठिताः ण् क् च् प्रभृतय इत्संज्ञकाः वर्णाः, अण्-अक्-अच्-इत्यादि-प्रत्याहारप्रयोजनका इति ।

(४) आदिः प्रथमान्तम् । अन्त्येन तृतीयान्तम् । सह इति अव्ययपदम् । इता तृतीयान्तम् । अन्त्ये भवः अन्त्यः, तेन इता सहोच्चार्यमाणः आदिः अण् अक् इच् इत्यादिरूपा संज्ञेत्यर्थः । यस्मात्पूर्वं नास्ति परमस्ति स आदिः, यस्मात्परं नास्ति पूर्वश्चास्ति सोऽन्तः । आद्यन्तशब्दाभ्यामत्र मध्यगा आक्षिप्यन्ते । 'स्वं रूपमि'ति सूत्रात् स्वमित्यनुवर्त्तते षष्ठ्या च विपरिणम्यते । तदाह—**अन्त्येनेत्यादि ।**

(५) अणादिसंज्ञासु सिद्धासु अचो ह्रस्वादिसंज्ञां दर्शयति—**ऊकालोऽजिति ।**

मूलार्थ—उस इत्संज्ञक वर्ण का लोप हो जाता है ।

(४) पद—आदिः, अन्त्येन, सह, इता । **अनुवृत्ति**—स्वं रूपम् । **संज्ञासूत्र ।**

मूलार्थ—अन्तिम इत्संज्ञक वर्ण के साथ उच्चार्यमाण आदि वर्ण अपने तथा मध्यवर्ती वर्णों का बोधक होता है । जैसे—'अण्' अ इ उ वर्णों का बोधक है । उसी प्रकार अच्, हल्, अल् इत्यादि प्रत्याहार भी जानने चाहिए ।

विमर्श—यह प्रत्याहारबोधक सूत्र है । यहाँ आदि और अन्त्य पद अवयवार्थक हैं । इन आदि और अन्त्य शब्दों से समुदाय का आक्षेप किया जाता है । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' सूत्र से 'स्वं रूपम्' की अनुवृत्ति है । इस प्रकार आदि और अन्त्य पद मध्यवर्ती वर्णों के साथ स्वयं आदि वर्ण भी संज्ञी है । अन्तिम इत्संज्ञक वर्ण का लोप हो जाने से प्रत्याहार में उसे सम्मिलित नहीं किया जाता । जैसे—अच् प्रत्याहार में अन्त्य इत् हुआ 'ऐऔच्' का चकार, तत्सदृश अच् का चकार, उसके साथ आदि वर्ण अइउण् का अकार (उसके सदृश अच् का अकार), उससे आक्षिप्त समुदाय—'अ इ उ ऋ ऌ ए ओ ऐ औ' है । इसी प्रकार अण्-अल् इत्यादि प्रत्याहारों की सिद्धि होती हैं ।

प्रत्याहारों की संख्या ४२ है, जिनका क्रम इस प्रकार है—

१. अक्	७. अण्	१३. एङ्	१९. चर्	२५. झल्	३१. यञ्	३७. वल्
२. अच्	८. अण्	१४. एच्	२०. चय्	२६. झश्	३२. यण्	३८. वश्
३. अट्	९. इण्	१५. ऐच्	२१. छव्	२७. झष्	३३. यम्	३९. शर्
४. अम्	१०. इक्	१६. खर्	२२. जश्	२८. बश्	३४. यय्	४०. शल्
५. अल्	११. इच्	१७. खय्	२३. झय्	२९. भष्	३५. यर्	४१. हल्
६. अश्	१२. उक्	१८. ङम्	२४. झर्	३०. मय्	३६. रल्	४२. हश्

इसके अतिरिक्त र प्रत्याहार भी है । जिसका विवेचन पूर्व में किया जा चुका है ।

(५) पद—ऊकालः, अच्, ह्रस्वदीर्घप्लुतः । **संज्ञासूत्र ।**

मूलार्थ—उ, ऊ और ऊ ३—ये तीनों उकार 'वः' पद से जाने जाते हैं । इन एकमात्रिक,

त्रिधा । (६) उच्चैरुदात्तः १।२।२९ । ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् । (७) नीचैरनुदात्तः १।२।३० । ताल्वादिषु सभागेषु स्थानेष्व-

---

ह्रस्वदीर्घप्लुत इति समाहारद्वन्द्वः, सौत्रं पुंस्त्वम् । वां काल इवेति । फलितार्थ-कथनमिदम् । विग्रहस्तु वः कालो यस्येति बोध्यः । अपदेन स्वोच्चारणकालो लक्ष्यते ।

(६) उच्चैः अव्ययपदम्, उदात्तः प्रथमान्तम् । उच्चैश्शब्दोऽधिकरणशक्ति-प्रधानः 'ऊर्ध्वभागे' इत्यर्थे वर्तते । 'ऊकालोऽच्' इत्यतः 'अच्' इत्यनुवर्तते । तदेत-दाह—**ताल्वादिष्वित्यादिना । सभागेष्विति ।** ताल्वादीनां स्थानानां सावयवत्व-कथनम् ऊर्ध्वभागे इत्यस्योपपादनार्थम्, तेषामखण्डत्वे ऊर्ध्वभागे इत्यनुपपत्तेः ।

द्विमात्रिक और त्रिमात्रिक उकार के उच्चारण काल के समान जिस अच् का उच्चारण काल हो, उस अच्=स्वर की क्रमशः ह्रस्व, दीर्घ और प्लुत संज्ञा होती है । वह अच् उदात्त, अनुदात्त और स्वरित भेद से पुनः तीन प्रकार का होता है ।

विमर्श—सूत्र में पठित काल शब्द मात्रा-विशेष का बोधक है । ह्रस्व, दीर्घ और प्लुप्त—ये तीनों संज्ञाएँ स्वर वर्ण के उच्चारण में लगने वाले सीमित समय की मापक हैं । उ, ऊ और ऊ ३ से क्रमशः एकमात्रिक, द्विमात्रिक और त्रिमात्रिक स्वरों का बोध होता है । इन तीनों कालों का अन्वय यथासंख्य परिभाषा के द्वारा ह्रस्व, दीर्घ और प्लुत शब्दों के साथ होने से एकमात्रिक स्वर की ह्रस्वसंज्ञा, द्विमात्रिक की दीर्घसंज्ञा तथा त्रिमात्रिक की प्लुत संज्ञा होती है ।[1] वह ह्रस्व, दीर्घ और प्लुत रूप प्रत्येक अच् उदात्त, अनुदात्त और स्वरित भेद से तीन प्रकार का होता है ।

विशेष—यहाँ शंका होती है कि वर्णसमाम्नाय में पहले अकार का पाठ किया गया है; उसको तथा इ को छोड़कर सूत्रकार ने दृष्टान्त के रूप में उ वर्ण का ग्रहण क्यों किया ? इसका समाधान है कि ब्राह्ममुहूर्त में कुक्कुट (मुर्गा) की ध्वनि कु, कू, कू ३ में क्रमशः आरोह होता है । उसमें एकमात्रिक ह्रस्व उ, द्विमात्रिक दीर्घ ऊ तथा त्रिमात्रिक प्लुत ऊ ३ प्रसिद्ध है । यह मात्रा समय का प्राकृतिक मापक है । अतः आचार्य ने प्राकृतिक मुर्गे की ध्वनि का आश्रय लेकर सूत्र में उच्चारणकाल का निर्धारण किया है ।

(६) पद—उच्चैः, उदात्तः । **अनुवृत्ति**—अच् । **संज्ञासूत्र ।**

मूलार्थ—मुख के भीतर तालु आदि सभाग स्थानों के ऊर्ध्वभाग से उच्चरित स्वरवर्णों की उदात्त संज्ञा होती है ।

विमर्श—आचार्य पाणिनि ने वर्णों की उच्चारण पद्धति में उदात्तादि वर्णधर्मों की निष्पत्ति पर सूक्ष्म विचार किया है । प्रकृत सूत्र में 'उच्चैः' तथा 'उदात्तः' दो पद हैं । 'ऊकालोऽच्०' (१।२।२७) सूत्र से 'अच्' पद अनुवृत्त है । सामान्यतः 'उच्चैः' शब्द से 'ऊँचे स्वर से बोलना' अर्थ लिया जाता है, किन्तु यहाँ 'उच्चैः' शब्द मुख के अन्दर स्थित तालु, कण्ठ आदि भागों के ऊपरी भाग का ज्ञान कराता है; क्योंकि तालु, कण्ठ, मूर्धा, दन्त, ओष्ठ आदि स्थानों से वर्णों का उच्चारण किया जाता है । इन स्थानों के उच्चैः=ऊपरी भागों से उच्चरित अच्=स्वर वर्ण उदात्तसंज्ञक होते हैं ।

(७) पद—नीचैः, अनुदात्तः । **अनुवृत्ति**—अच् । **संज्ञासूत्र ।**

मूलार्थ—तालु आदि सभाग स्थानों के अधोभाग में उच्चरित अच् अनुदात्तसंज्ञक होता है ।

---

१. 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् ॥'

धोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्। (८) समाहारः स्वरितः १।२।३१। उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। सः नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा। (९) मुखनासिकावचनोऽनुनासिकः १।१।८। मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम्–

---

(७) अनुदात्तसंज्ञामाह—**नीचैरिति**। नीचैश्शब्दोऽधिकरणशक्तिप्रधानः 'अधोभागे' इत्यर्थे विद्यते।

(८) स्वरितसंज्ञामाह—**समाहारः स्वरित इति**। पूर्वसूत्राभ्याम् उदात्तानुदात्तपदे अनुवृत्ते व्याख्यानाद् धर्मप्रधाने षष्ठ्यन्ततया च विपरिणम्येते। यत्र समाहरणं स समाहारः। अधिकरणे घञ्। 'ऊकालोऽजि'त्यस्मात् अजित्यनुवर्तते। ततश्चोदात्तत्वानुदात्तत्वयोर्धर्मयोर्यस्मिन्नचि मेलनं स्यात् सोऽच् स्वरितसंज्ञको भवतीत्यर्थः।

(९) अनुनासिकसंज्ञामाह—**मुखनासिकेति**। मुखसहिता नासिका मुखनासिकेति

विमर्श—प्रकृत सूत्र में भी 'नीचैः' पद मुख के अन्तर्गत तालु आदि भागों के निम्न भाग का बोधक है। अतः तालु-कण्ठादि स्थानों के नीचैः=नीचे के भागों से उच्चरित स्वर वर्ण की अनुदात्त संज्ञा होती है।

विशेष—ऋग्वेद में अनुदात्त स्वर को वर्ण के नीचे पड़ी रेखा द्वारा निर्दिष्ट किया जाता है।

(८) पद—समाहारः स्वरितः। **अनुवृत्ति**—उदात्तः, अनुदात्तः, अच्। **संज्ञासूत्र।**

मूलार्थ—उदात्तत्व और अनुदात्तत्व दोनों वर्णधर्म जिसमें इकठ्ठे हो जाये, वह अच्=(स्वर) स्वरितसंज्ञक होता है।

विमर्श—सूत्र में 'समाहारः' संज्ञी है और 'स्वरितः' संज्ञा। उदात्तत्व और अनुदात्तत्व दोनों वर्णधर्मों का समाहार=एकीकरण ही 'स्वरित' कहलाता है। दोनों वर्णधर्मों का एकत्र समावेश होने से उच्चारण की मध्यता प्रतीत होती है। यहाँ यह शंका की जाती है कि उदात्त और अनुदात्त दो विरोधी वर्णधर्म हैं। उनका एक अच् में मिलना सम्भव कैसे होगा? इसका समाधान यह है कि—जिस वर्ण की 'स्वरित' संज्ञा होती है, उसमें अंशद्वय की स्थिति समष्टि रूप में रहती है। जिसमें उदात्त धर्म की स्थिति है, उस अंश में अनुदात्तत्व धर्म की स्थिति नहीं एवं जिस अंश में अनुदात्तत्व की स्थिति है, उसमें उदात्तत्व धर्म की स्थिति नहीं। इस प्रकार इन्हीं दोनों वर्णधर्मों के मेल से स्वरित स्वर की उत्पत्ति होती है।

विशेष—ऋग्वेद में स्वरित स्वर का चिह्न वर्ण के ऊपर एक खड़ी रेखा द्वारा सूचित किया जाता है।

इस प्रकार ह्रस्व, दीर्घ, और प्लुत—ये तीनों उदात्तादि भेद से नौ प्रकार के होते हैं। यथा—१. ह्रस्वोदात्त, २. ह्रस्वानुदात्त, ३. ह्रस्वस्वरित, ४. दीर्घोदात्त, ५. दीर्घानुदात्त, ६. दीर्घस्वरित, ७. प्लुतोदात्त, ८. प्लुतानुदात्त, ९. प्लुतस्वरित। उक्त रीति से नौ प्रकार का वह अच् पुनः अनुनासिक और अननुनासिक भेद से दो-दो प्रकार का होता है। जो अग्रिम सूत्र द्वारा स्पष्ट किया गया है।

(९) पद—मुखनासिकावचनः, अनुनासिकः। **संज्ञासूत्र।**

मूलार्थ—मुख सहित नासिका (नाक) से जिस वर्ण का उच्चारण होता है, वह अनुनासिक संज्ञक वर्ण कहलाता है।

अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश । तस्य दीर्घाभावात् । एचामपि द्वादश । तेषां ह्रस्वाभावात् । (१०) तुल्यास्यप्रयत्नं सवर्णम् १।१।९ । ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

विग्रहः 'शाकपार्थिवादित्वात् सहितपदस्य लोपः ।' उच्यतेऽसाविति वचनः, कर्मणि ल्युट् । मुखनासिकया वचन इति 'मुखनासिकावचनः' । 'कर्तृकरणे कृता बहुलमि'ति तृतीयासमासः ।

सर्वेषां स्वराणां सामान्यरूपेणाष्टादशभेदाः न भवन्तीत्याह—**तदित्थमिति ।**

(१०) अथ सवर्णसंज्ञामाह—**तुल्यास्येति ।** आस्यशब्दोऽत्र न मुखमात्रपरः, किन्तु आस्ये=मुखे भवम् आस्यम्=ताल्वादिस्थानम् 'शरीरावयवाद्यत्' इति भवार्थे

विमर्श—अनुनासिक पद का अर्थ है—'नासिकाम् अनुगत इति अनुनासिकः (नासिकाम् अनु=पश्चात् प्राप्तः)' अर्थात् नासिका से उच्चरित वर्ण । सामान्यतया वर्णों का उच्चारण मुख से ही होता है, किन्तु जिस वर्ण के उच्चारण में मुख के साथ नासिका भी सक्रिय हो, वह अनुनासिक कहलाता है ।[1] इस प्रकार वर्गों के अन्तिम वर्ण ङ्, ञ्, ण्, न् और म् अनुनासिक हैं ।

इन अनुनासिक और अननुनासिक दो भेदों के कारण पूर्वोक्त नौ भेदों को दुगुना करने से अ, इ, उ, ऋ इनमें से प्रत्येक वर्ण के अठारह भेद हुए । दीर्घ न होने से लृ के बारह भेद हैं। ह्रस्व न होने से ए, ओ, ऐ, औ इनमें प्रत्येक के बारह भेद हैं ।

स्वरों का भेदबोधक चक्र

अ इ उ ऋ लृ	अ इ उ ऋ ए ओ ऐ औ	
(ह्रस्व भेद)	(दीर्घ भेद)	(प्लुत भेद)
१. ह्रस्व उदात्तानुनासिक	७. दीर्घ उदात्तानुनासिक	१३. प्लुत उदात्तानुनासिक
२. ,, उदात्ताननुनासिक	८. ,, उदात्ताननुनासिक	१४. ,, उदात्ताननुनासिक
३. ,, अनुदात्तानुनासिक	९. ,, अनुदात्तानुनासिक	१५. ,, अनुदात्तानुनासिक
४. ,, अनुदात्ताननुनासिक	१०. ,, अनुदात्ताननुनासिक	१६. ,, अनुदात्ताननुनासिक
५. ,, स्वरितानुनासिक	११. ,, स्वरितानुनासिक	१७. ,, स्वरितानुनासिक
६. ,, स्वरिताननुनासिक	१२. ,, स्वरिताननुनासिक	१८. ,, स्वरिताननुनासिक

स्वरों के अष्टादश भेदों का निरूपण करने के पश्चात् आचार्य सवर्ण संज्ञा का निरूपण करते हैं—

(१०) पद—तुल्यास्यप्रयत्नम् , सवर्णम् । **संज्ञासूत्र ।**

मूलार्थ—तालु आदि स्थान और आभ्यन्तर प्रयत्न जिन वर्णों के तुल्य (=समान) हों उनकी परस्पर सवर्ण संज्ञा होती है ।

विमर्श—सूत्र में 'तुल्य' पद सदृश का पर्यायवाची है । 'आस्य' पद से मुखभवस्थान तालु आदि स्थानों का ग्रहण किया गया है । इन स्थानों से टकराकर वर्ण बाहर आते हैं अर्थात् उच्चरित होते हैं । इसी प्रकार प्रयत्न में 'प्र' शब्द से मुखभव यत्न-आभ्यन्तर का ही ग्रहण होता है, बाह्य का नहीं; क्योंकि वर्णों के बाहर निकलने के पूर्व आभ्यन्तर प्रयत्न होते हैं, जो वर्णों के उच्चारण में अत्यन्त सहायक होते हैं । इसी प्रयत्नशीलता के कारण यहाँ आभ्यन्तर प्रयत्न ही

---

१. 'किञ्चिन्मुखवचनम् , किञ्चिन्नासिकावचनम् ।' (व्याकरणमहाभाष्यम्)

(ऋऌवर्णयोर्मिथः सावर्ण्यं वाच्यम्) । अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य । इति स्थानानि । यत्नो द्विधा—आभ्यन्तरो बाह्यश्च । आद्यः पञ्चधा । स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयतनं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्व-

---

यत्प्रत्ययः । प्रकृष्टो यत्नः प्रयत्नः । आस्यञ्च प्रयत्नश्चास्यप्रयत्नौ, तुल्यौ आस्यप्रयत्नौ यस्य वर्णजालस्य तत्तुल्यास्यप्रयत्नम्, परस्परं सवर्णसंज्ञकं स्यादित्याह—**ताल्वादीति** ।

ऋऌवर्णयोः स्थानसाम्याभावादप्राप्ता सवर्णसंज्ञा वार्तिककृता विधीयते—**ऋऌवर्णयोरिति** । ऋ च ऌवर्णश्च ऋऌवर्णौ, तयोः ऋऌवर्णयोर्मिथः परस्परं सावर्ण्यं=सवर्णत्वं वक्तव्यमित्यर्थः । कस्य किं स्थानमित्याकाङ्क्षायां तद्व्यवस्थापकानि शिक्षावचनान्यर्थतः सङ्गृह्णाति—**अकुहविसर्जनीयामिति** । 'अ' इत्यष्टादशभेदाः गृह्यन्ते । 'कु' इति कादिपञ्चात्मकः कवर्गः । विसर्जनीयशब्दोऽपि विसर्गपर्यायः । **दन्ता इति** । दन्तमूलप्रदेशा इत्यर्थः, अतो भग्नदन्तस्याप्युच्चारणं भवत्येव । **नासिका चेति** । चकारेण स्वस्ववर्गानुकूलं ताल्वादि गृह्यते । **यत्नो द्विधेति** । यत्नशब्दोऽत्र प्रयत्नपरः । यत्नानामाभ्यन्तरत्वं बाह्यत्वञ्च वर्णानामुत्पत्तेः प्रागूर्ध्वंभावित्वमिति शिक्षाग्रन्थेषु स्पष्टम् ।

अपेक्षित है । अतः जिन वर्णों के कण्ठ, तालु, मूर्धा आदि स्थान और आभ्यन्तर प्रयत्न समान हों, वे परस्पर सवर्ण-कहलाते हैं ।

मूलार्थ—ऋकार और ऌकार की (भिन्न स्थान होने पर भी) परस्पर सवर्ण संज्ञा होती है । अकार, कु=(कवर्ग) क्, ख्, ग्, घ्, ङ्, ह् और विसर्ग[1] का कण्ठ स्थान है । इ, चु=(चवर्ग) च, छ, ज, झ, ञ्, य और श का तालु स्थान है । ऋ, टु=(ट वर्ग) ट्, ठ्, ड्, ढ्, ण्, र् और ष् का मूर्धा स्थान है । ऌ, तु=(त वर्ग) त्, थ्, द्, ध्, न्, ल् और स् का दन्त स्थान है । उ, पु=(पवर्ग) प, फ, ब, भ, म और उपध्मानीय का ओष्ठ स्थान है । ञ, म, ङ, ण, न का नासिका स्थान भी है । ए, ऐ का स्थान कण्ठतालु है । ओ, औ का स्थान कण्ठोष्ठ है । 'व' का स्थान दन्तोष्ठ है । जिह्वामूलीय का स्थान जिह्वामूल है । अनुस्वार का स्थान नासिका है—ये वर्णों के स्थान हैं । यत्न दो प्रकार के हैं—आभ्यन्तर और बाह्य । प्रथम आभ्यन्तर प्रयत्न के पाँच भेद हैं—१. स्पृष्ट, २. ईषत्स्पृष्ट, ३. ईषद्विवृत ४. विवृत और ५. संवृत । स्पर्श वर्णों का स्पृष्ट प्रयत्न है । अन्तःस्थ वर्णों का ईषत्स्पृष्ट प्रयत्न है । ऊष्माण=श, ष, स और ह वर्णों का ईषद्विवृत प्रयत्न है । स्वरों का विवृत प्रयत्न है । ह्रस्व अ का प्रयोगदशा में संवृत प्रयत्न है, किन्तु प्रक्रियादशा में विवृत प्रयत्न रहता है । यह आचार्य पाणिनि ने 'अ अ' सूत्र से ज्ञापित किया है ।

---

१. यहाँ अकार के साहचर्य के कारण विसर्ग का कण्ठ स्थान कहा गया है, किन्तु विसर्ग अयोगवाह है; अतः आश्रय का जो स्थान होगा, वही विसर्ग का स्थान होगा । जैसे 'रामः' यहाँ विसर्ग का स्थान कण्ठ होगा और 'हरिः' यहाँ विसर्ग का स्थान तालु होगा, क्योंकि पाणिनीय शिक्षा में स्पष्ट कहा गया है—

'अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ।' पा० शि०—२२

स्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव । बाह्यप्रयत्नस्त्वेकादशधा—विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः । कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शषसहा ऊष्माणः । अचः स्वराः । ≍क≍ख

आद्यः—आभ्यन्तरप्रयत्नमित्यर्थः । **बाह्य इति** । आस्यबहिर्भूतदेशे गलविवरादौ विकासादिरूपकार्यंकरो बाह्यः । **घोषाश्चेति** । चकारेणाचामपि सङ्ग्रहः । **यणश्चेति** । अत्रापि चेनाचो ग्रहणं भवति । एवञ्च बाह्यप्रयत्नेऽचामपि घोषसंवारनादाल्पप्राणाः प्रयत्नाः भवन्ति । **ह्रस्वस्यावर्णस्येति** । प्रयोगे इत्यस्य व्यवहारकाले इत्यर्थः । प्रक्रिया-

---

बाह्य प्रयत्न ग्यारह प्रकार के हैं—विवार, संवार, श्वास, नाद, घोष, अघोष, अल्पप्राण, महाप्राण, उदात्त, अनुदात्त और स्वरित । खर् प्रत्याहार बोध्य वर्णों का विवार, श्वास तथा अघोष प्रयत्न है । हश् प्रत्याहार के संवार, नाद और घोष प्रयत्न हैं । वर्गों के प्रथम (क, च, ट, त, प), तृतीय (ङ, ज, ड, द ब) और पञ्चम (ङ, ञ, ण, न, म) तथा यण् (य, व, र, ल) के अल्पप्राण प्रयत्न हैं । वर्गों के द्वितीय (ख, छ, ठ, थ फ), चतुर्थ (घ, झ, ढ, ध भ) तथा शल् प्रत्याहार के महाप्राण प्रयत्न हैं । क से म पर्यन्त वर्ण स्पर्श कहलाते हैं । यण्=य, र, ल, व को अन्तःस्थ कहते हैं । श्, ष्, स्, ह् को ऊष्म कहते हैं । अच्=(अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ) स्वर कहलाते हैं । ≍क≍ख में क और ख से पूर्व आधे विसर्ग के समान जिह्वामूलीय कहलाता है । ≍प≍फ यहाँ प और फ से पहले आधे विसर्ग के समान उपध्मानीय कहलाता है । 'अं' और 'अः' इनमें स्वर वर्ण के बाद क्रमशः अनुस्वार और विसर्ग कहलाते हैं ।

विमर्श—प्रसङ्गवश सवर्णसंज्ञा में उपयोगी वर्णों के प्रमुख आठ स्थानों का निरूपण किया गया है, जो अधोलिखित वर्णोद्भवस्थान-बोधक चक्र से स्पष्ट हो जायेगा—

स्थान-बोधक चक्र

वर्ण		उच्चारण स्थान
स्वर	व्यञ्जन	स्थान
अ	क, ख, ग, घ, ङ, ह, (: विसर्ग)	कण्ठ
इ	च, छ, ज, झ, ञ, य, श	तालु
ऋ	ट, ठ, ड, ढ, ण, र, ष	मूर्धा
ऌ	त, थ, द, ध, न, ल, स	दन्त
उ	प, फ, ब, भ, म (≍प≍फ-उपध्मानीय)	ओष्ठ
	ञ, म, ङ, ण, न	नासिका तथा स्वस्वर्गीय स्थान
ए, ऐ		कण्ठतालु
ओ, औ		कण्ठोष्ठ
	व	दन्तोष्ठ
	≍क≍ख-जिह्वामूलीय	जिह्वामूल
	(अनुस्वार)	नासिका

इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ≍प≍फ इति पफाभ्यां प्रागर्ध-विसर्गसदृश उपध्मानीयः। अं अः इत्यचः परावनुस्वारविसर्गौ। (११) अणुदि-

दशायाम्='शास्त्ररीत्या शब्दसाधनसमये' इत्यर्थः, संवृतत्वविधायकस्य 'अ अ' इति सूत्रस्य सम्पूर्णामष्टाध्यायीं प्रत्यसिद्धत्वात्।

यत्न दो प्रकार के होते हैं—आभ्यन्तर और बाह्य। वर्णों के मुख से बाहर निकलने से पहले किये गये प्रयत्न 'आभ्यन्तर' कहलाते हैं। उसके पश्चात् होने वाले प्रयत्न बाह्य हैं। वर्णोत्पत्ति में अव्यवहित पूर्व न होने से बाह्य प्रयत्न को गौण प्रयत्न कहा जाता है।[1]

आभ्यन्तर प्रयत्न पाँच हैं—स्पृष्ट, ईषत्स्पृष्ट, ईषद्विवृत, विवृत और संवृत। इनका विवेचन मूलार्थ में किया जा चुका है। जब क से म पर्यन्त २५ व्यञ्जनों में जिह्वा तालु तथा कण्ठ आदि स्थानों का स्पर्श करती है, तब उसे स्पृष्ट प्रयत्न कहते हैं। 'ईषत्स्पृष्ट' का अर्थ है—तालु आदि स्थानों को जिह्वा द्वारा धीरे से स्पर्श करना। 'विवृत' का अर्थ है—जिह्वा एवं तालु आदि उच्चारण स्थानों के बीच का मार्ग खुला रहे। 'ईषद्विवृत' से तात्पर्य है कि उक्त मध्य का मार्ग थोड़ा-सा विवृत=खुला रहे। संवृत प्रयत्न ह्रस्व अकार के व्यवहार काल में होता है। साधनिकादशा में विवृत ही होता है। क्योंकि ह्रस्व 'अ' का संवृत-विधायक सूत्र 'अ अ' (८।४।६८) सम्पूर्ण अष्टाध्यायी के प्रति असिद्ध माने जाने से इस सूत्र के द्वारा किये गये कार्य की ओर शास्त्र की दृष्टि नहीं जाती। अतः वह अकार विवृत माना गया है। वर्णों के आभ्यन्तर प्रयत्न को निम्न चक्र से स्पष्ट किया गया है—

आभ्यन्तरप्रयत्न-बोधक चक्र

आ. प्रयत्न	स्पृष्ट	ईषत्स्पृष्ट	ईषद्विवृत	विवृत	संवृत
संज्ञा	स्पर्श	अन्तःस्थ	ऊष्म	स्वर	
वर्ण	क,ख,ग,घ,ङ च,छ,ज,झ,ञ ट,ठ,ड,ढ,ण त,थ,द,ध,न प,फ,ब,भ,म	य, व, र, ल	श, ष, स, ह	अ, इ, उ ऋ, लृ, ए ओ, ऐ, औ	ह्रस्व अकार (प्रयोगदशा में)

बाह्य प्रयत्न ग्यारह प्रकार के होते हैं, जिनका विवेचन मूलार्थ में किया गया है। जिन वर्णों का उच्चारण करते समय कण्ठ का विकास हो, उनको विवार कहते हैं। जिन वर्णों के उच्चारण करते समय श्वास चलता हो उसे श्वास, जिनके उच्चारण में नाद=व्यक्त ध्वनि हो उसे नाद तथा जिन वर्णों का उच्चारण करने में गूँज होती हो उनको घोष, तदतिरिक्त को अघोष एवं जिन वर्णों के उच्चारण में प्राणवायु का अल्प उपयोग हो उसे अल्पप्राण और अधिक उपयोग हो उसे महाप्राण कहते हैं।

किन वर्णों का कौन-सा बाह्य प्रयत्न है? यह निम्नलिखित चक्र से स्पष्ट हो जायेगा।

विमर्श—सूत्रार्थ स्पष्ट है। **उदाहरण**—(१) शिवाय+ओंनमः (अ+ओं='ओ' पररूप) शिवायों नमः। अर्थ—शिव को नमस्कार। (२) 'शिव+आ+इह' इस स्थिति में (अ+आ) दीर्घ तथा (आ+इ) गुण दोनों की प्राप्ति है। परन्तु अन्तरङ्ग होने से दीर्घ को बाधकर प्रथम गुण (आ+इ=ए) पश्चात् 'शिव+ए हि' में पूर्वान्तवद्भाव से आङ् का आरोप होने से (अ+ए=ए) पररूप=शिवेहि। अर्थ—हे शिव! रक्षार्थ आओ।

(४७) पद—अकः, सवर्णे, दीर्घः। **अनुवृत्ति**—अचि। **विधिसूत्र**।

मूलार्थ—अक् से सवर्ण अच् परे रहते पूर्व-पर के स्थान में दीर्घ रूप एकादेश होता है।

श्रीशः । विष्णूदयः । (ऋति सवर्णे ऋ वा) । होतृकारः । होतॄकारः । (४८) एङः पदान्तादति ६।१।१०९ । पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव । (४९) सर्वत्र विभाषा गोः ६।१।१२२ । लोके वेदे चैङन्तस्य गोरिति वा प्रकृतिभावः पदान्ते । गो अग्रम् । गोऽग्रम् । एङन्तस्य किम् । चित्रग्वग्रम् । पदान्ते

दैत्यानामसुराणामरिः=शत्रुः 'दैत्यारिः' । 'दैत्य+अरिः' इति स्थिते 'अकः सवर्णे दीर्घः' इत्यनेन सवर्णेऽचि परे पूर्वपरयोः स्थाने दीर्घे कृते 'दैत्यारिः' इति । **ऋति सवर्ण इति** । अकः सवर्णे ऋति परे पूर्वपरयोः ऋ इत्येकादेशो विकल्पेन भवतीत्यर्थः ।

(४८) 'अमि पूर्वः' इत्यतः पूर्व इत्यनुवर्तते । एकः पूर्वपरयोरित्यधिकृतम् । अतः पदान्तादेङोऽति परे पररूपमित्यर्थः ।

(४९) 'एङः पदान्तादति' इत्यतः 'एङः' इति 'पदान्तादि'ति चानुवर्तते । 'प्रकृत्यान्तः पादमि'त्यतः प्रकृत्येत्यनुवर्तते । प्रकृत्या स्वरूपेण—निर्विकाररूपेणाऽवतिष्ठत इत्यर्थः ।

दैत्यारिः, श्रीशः, विष्णूदयः । (वा०) ऋत् से परे सवर्ण ऋत् रहे तो पूर्व-पर के स्थान में ह्रस्व ऋ आदेश विकल्प से होता है । होतृकारः, होतॄकारः ।

विमर्श—प्रकृत सूत्र में 'इको यणचि' सूत्र से 'अचि' की अनुवृत्ति आती है । 'एकः पूर्वपरयोः' का अधिकार है । अक् (=अ इ उ ऋ ऌ) तथा इनके पश्चाद्वर्ती अच् (सवर्ण स्वर वर्ण) परस्पर मिलकर दीर्घ रूप में परिणत हो जाते हैं । **उदाहरण**—(१) दैत्य+अरिः (अ+अ='आ' दीर्घ) दैत्य् आ रिः—दैत्यारिः । अर्थ—विष्णु । (२) श्री+ईशः (ई+ई='ई' दीर्घ) श्+ईशः=श्रीशः । अर्थ—विष्णु । (३) विष्णु+उदयः (उ+उ='ऊ' दीर्घ) विष्ण् ऊदयः—विष्णूदयः । अर्थ—**विष्णु** का अवतार ।

(वा०) अक् के अनन्तर सवर्ण ऋ के होने पर पूर्व-पर वर्णों के स्थान पर 'ऋ' आदेश विकल्प से होता है । **उदाहरण**—(४) होतृ+ऋकारः (ऋ+ऋ=ऋ)=होतृकारः पक्ष में दीर्घ (ऋ+ऋ=ॠ) होकर होतॄकारः ।

(४८) पद—एङः, पदान्ताद्, अति । **अनुवृत्ति—**पूर्वं । **विधिसूत्र** ।

मूलार्थ—पदान्त एङ् से अत् परे रहते पूर्व-पर के स्थान में पूर्वरूप एकादेश होता है । हरेऽव । विष्णोऽव ।

विमर्श—'अमि पूर्वः' सूत्र से यहाँ पूर्व (पूर्वरूपम्) की अनुवृत्ति आती है । 'एकः पूर्वपरयोः' का अधिकार होने से—पद के अन्त में विद्यमान ए, ओ के अनन्तर ह्रस्व अकार रहे तो पूर्व-पर दोनों वर्णों के स्थान में पूर्वरूप एकादेश होता है । **उदाहरण**—(१) हरे+अव (ए+अ='ए' पूर्वरूप)=हरेऽव[1] । अर्थ—हे हरे ! रक्षा करो । (२) विष्णो+अव (ओ+अ='ओ' पूर्वरूप)=विष्णोऽव । अर्थ—हे विष्णो ! रक्षा करो ।

(४९) पद—सर्वत्र, विभाषा, गोः । **अनुवृत्ति**—एङः, पदान्ताद्, अति, प्रकृत्या । **विधिसूत्र** ।

मूलार्थ—लोक और वेद में एङन्त गो शब्द को विकल्प से प्रकृतिभाव होता है । गो अग्रम्, गोऽग्रम् । एङन्त क्यों कहा ? चित्रग्वग्रम् । पदान्त क्यों कहा ? गोः ।

---

१. पूर्वरूपसन्धि में लुप्त अकार को 'ऽ' चिह्न द्वारा दिखलाया जाता है ।

किम् ? गोः । (५०) अनेकाल्शित्सर्वस्य १।१।५५ । इति प्राप्ते । (५१) ङिच्च १।१।५३ । ङिदनेकालप्यन्त्यस्यैव स्यात् । (५२) अवङ् स्फोटायनस्य ६।१।१२३ । पदान्ते एङन्तस्य गोरवङ् वा स्यादचि । गवाग्रम् । पदान्ते किम् । गवि । (५३)

---

(५१) **ङिच्च इति** । अलोऽन्त्यस्येत्यनुवर्तते । ङिदपि अन्त्यस्यैवादेश इति भावः ।

(५२) **अवङ् स्फोटायनस्य** । पदान्तादिति, गोरिति, अचीति चानुवर्तते । स्फोटायनस्य महर्षेः मतेऽवङ् नान्यस्येति विकल्पः **गवाग्रमिति**—'गो + अग्रम्' इत्यत्र 'अनेकाल् शित्सर्वस्ये'ति सूत्रापवादभूतेन 'ङिच्चे'ति परिभाषाबलेन गोशब्दघटकौकारस्य 'अवङ् स्फोटायनस्य' इति सूत्रेणावङादेशेऽनुबन्धलोपे दीर्घे कृते 'गवाग्रमि'ति ।

विमर्श—प्रकृत सूत्र में 'प्रकृत्यान्तः पादमव्यपरे' सूत्र से 'प्रकृत्या' की अनुवृत्ति आती है। अतः प्रकृतिभाव का प्रकरण है। 'एङः पदान्तादति' से एङः तथा 'पदान्तात्' पदों का अनुवर्तन आता है। ये दोनों पद षष्ठी विभक्ति में परिवर्तित होकर 'गोः' के विशेषण बन जाते हैं। तदनुसार लौकिक एवं वैदिक दोनों प्रकार के प्रयोगों में पद के अन्त में विद्यमान एङन्त गो शब्द के आगे ह्रस्व अकार रहने पर विकल्प से प्रकृतिभाव होता है। प्रकृतिभाव होने से सन्धि जन्य कार्य (पूर्वरूप आदि) नहीं होते हैं।

उदाहरण—गो+अग्रम् (ओ+अ=ओ अ)—यथास्थिति रूप—गो अग्रम् । विकल्प होने के कारण पक्ष में 'गोऽग्रम्' 'एङः पदान्तादति' से पूर्वरूप । अर्थ—गायों में उत्तम । **प्रत्युदाहरण**—(१) सूत्र में एङन्त गो कहने से 'चित्रगु+अग्रम्' यहाँ प्रकृतिभाव नहीं हुआ प्राप्त यणादेश होकर चित्रग्वग्रम् । अर्थ—चितकबरी गायों का श्रेष्ठ स्वामी । (चित्रा गावः यस्य सः, बहुव्रीहिः) । (२) सूत्रार्थ में पदान्त पद का समावेश होने से 'गो+अस्' में प्रकृतिभाव **नहीं** हुआ । यहाँ भसंज्ञा होने से 'ओ' पदान्त नहीं है । अतः 'ङसिङसोश्च' से पूर्वरूप हुआ गोः ।

(५०) पद—अनेकाल्, शित्, सर्वस्य । **अनुवृत्ति**—षष्ठी । **परिभाषासूत्र ।**

मूलार्थ—अनेकाल् और शित् आदेश सम्पूर्ण स्थानी के स्थान में हों ।

विमर्श—एकश्चासौ अल् च एकाल् (कर्मधारय) न एकाल्—अनेकाल् (नञ्तत्पुरुष)= अनेक वर्णों वाला तथा श् इत् यस्य सः शित्=शकार इत्संज्ञक आदेश सम्पूर्ण पद के स्थान पर होते हैं ।

(५१) पद—ङित्, च । **अनुवृत्ति**—अलः, अन्त्यस्य (षष्ठी) । **परिभाषासूत्र ।**

मूलार्थ—ङित् आदेश यदि अनेकाल् भी हो तो अन्त्य के ही स्थान में होता है ।

विमर्श—यह सूत्र 'अनेकाल् शित् सर्वस्य' का अपवाद है । यहाँ अनुवृत्त 'षष्ठी' पद ङित् का विशेषण है । अतः सूत्रार्थ इस प्रकार होगा—षष्ठी निर्दिष्टो यो ङिदादेशः, सः अन्त्यस्य अलः स्थाने भवति । अर्थात् षष्ठी विभक्ति से निर्दिष्ट ङकारेत्संज्ञक आदेश अन्तिम वर्ण के स्थान में होता है । अतः 'गो+अग्रम्' में ङकार—इत्संज्ञक होने के कारण गो शब्द के अन्तिम वर्ण 'ओ' को 'अवङ्' आदेश हुआ ।

(५२) पद—अवङ्, स्फोटायनस्य । **अनुवृत्ति**—पदान्ताद्, गोः, अचि । **विधिसूत्र ।**

मूलार्थ—पदान्त में एङन्त गो शब्द को अच् परे रहते 'अवङ्' आदेश विकल्प से होता है । गवाग्रम् । पदान्त में क्यों कहा ? गवि । व्यवस्थित विभाषा होने से गवाक्षः ।

इन्द्रे च ६।१।१२४। गोरवङिन्द्रे। गवेन्द्रः। व्यवस्थितविभाषया गवाक्षः। (५४) दूराद्धूते च ८।२।८४। दूरात्सम्बोधने वाक्यस्य टेः प्लुतो वा।

अथ प्रकृतिभावः

(५५) प्लुतप्रगृह्या अचि नित्यम् ६।१।१२५। एतेऽचि प्रकृत्या स्युः।

पक्षे 'सर्वत्र विभाषा गोः' इत्यनेन विभाषया प्रकृतिभावे 'गो अग्रमि'ति। प्रकृतिभावाऽभावपक्षे 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपे गोऽग्रमिति रूपम्।

(५३) **इन्द्रे च**। गोशब्दादिन्द्रशब्दे परतो नित्यमवङ् स्यादित्यर्थः। **व्यवस्थितविभाषयेति**। लक्ष्यानुसारेण व्यवस्थायां प्रवृत्ता विभाषा व्यवस्थितविभाषेत्युच्यते। यथा क्वचिद् भवत्यंश एव प्रवर्त्तते, क्वचिन्न भवत्यंश एव, क्वचिदुभयम्। 'गवाक्षः' इत्यत्र तु नित्यमवङ् बोध्यम्।

(५५) 'प्रकृत्यान्तः पादमि'त्यतः प्रकृत्येत्यनुवर्तते। **आगच्छ कृष्ण** इति। अत्र 'दूराद्धूते च' इति सूत्रेण टिसंज्ञकस्य णकारोत्तरवर्त्यकारस्य प्लुतत्वं विधाय 'प्लुतप्रगृह्या०' इत्यनेन प्रकृतिभावे 'आगच्छ कृष्ण ३ अत्रे'ति। तेन नात्र सवर्णदीर्घः।

विमर्श—'गो' शब्द के ओकार के स्थान में (ङित् होने से) अवङ् आदेश स्वर वर्ण परे रहते केवल स्फोटायन आचार्य के मत में ही होता है। अन्य आचार्यों के मत में नहीं। अतः यहाँ विकल्प माना जाता है।

उदाहरण—गो+अग्रम् (ओ=अवङ्—अव) ग् अव+अग्रम् (दीर्घ अ+अ=आ) गवाग्रम्। अर्थ—गायों में उत्तम।

प्रत्युदाहरण—पदान्त में कहने से गो+इ (ङि) में ओकार पदान्त में न रहने से अवङ् आदेश नहीं हुआ। 'अव्' आदेश होकर 'गवि' रूप बना।

व्यवस्थित विभाषा का तात्पर्य है कि कहीं-कहीं विकल्प विधान में भी भावात्मक कार्य की ही प्रवृत्ति होती है। अतः व्यवस्थित विभाषा होने के कारण 'गो+अक्षः' में नित्य अवङ् आदेश हुआ। गो+अक्षः (ओ=अव)—गव+अक्षः (दीर्घ)=गवाक्षः। अर्थ—झरोखा।

(५३) पद—इन्द्रे, च। **अनुवृत्ति**—गो, अवङ्। **विधिसूत्र**।

मूलार्थ—गो शब्द को अवङ् आदेश होता है इन्द्र शब्द के परे रहते।

विमर्श—गो शब्द के ओकार के स्थान में इन्द्र शब्द परे हो तो 'अवङ्' आदेश होता है। **उदाहरण**—गो+इन्द्रः (अवङ्) ओ=अव—गव+इन्द्रः (अ+इ='ए' गुण)=गवेन्द्रः।

(५४) पद—दूराद्, हूते च। **अनुवृत्ति**—वाक्यस्य, टेः, प्लुतः। **विधिसूत्र**।

मूलार्थ—दूर से सम्बोधन में (पुकारने पर) वाक्य की टि को प्लुत होता है, विकल्प से।

(५५) पद—प्लुतप्रगृह्याः, अचि, नित्यम्। **अनुवृत्ति**—प्रकृत्या। **विधिसूत्र**।

मूलार्थ—प्लुतसंज्ञक और प्रगृह्यसंज्ञक को नित्य प्रकृतिभाव होता है, अच् परे रहते।

स्वरसन्धि का विवेचन करने के अनन्तर विशेष स्थिति में शब्द के स्वाभाविक रूप की साधुता का निरूपण करने के लिए प्रस्तुत प्रकरण में प्रकृतिभाव के नियमों का उल्लेख किया जा रहा है।

आगच्छ कृष्ण ३ अत्र गौश्चरति। (५६) ह्रस्वं लघु १।४।१०। (५७) संयोगे गुरुः १।४।११। संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात्। (५८) दीर्घं च १।४।१२। गुरु स्यात्। (५९) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८।२।८६। प्लुतो वा। दे३वदत्त ३। गुरोः किम्? वकारादकारस्य मा भूत्। अनृतः किम्? कृष्ण ३। एकैकग्रहणं पर्यायार्थम्। (६०) ईदूदेद्द्विवचनं प्रगृह्यम् १।१।११। ईदूदेदन्तं

---

(५९) गुरोरनृतोऽनन्त्यस्येति। 'दूराद्धूते चे'त्यनुवर्तते। 'वाक्यस्य टेः प्लुत उदात्तः' इत्यधिकृतम्। दूरात्सम्बोधने यद्वाक्यं तत्र सम्बोध्यमानवाचकं यत्पदं तदवयवस्य ऋकारभिन्नस्यानन्त्यस्य गुरोः प्लुतः स्यात्। अन्त्यस्य तु गुरोरगुरोश्चापि स्यादित्यर्थः। अपिना टेः समुच्चयात्।

(६०) ईदूदेदिति। ईच्च ऊच्च एच्चेति समाहारद्वन्द्वः। ईदूदेदिति द्विवचन-

---

विमर्श—प्रस्तुत सूत्र में 'प्रकृत्यान्तः पादमव्यपरे' (६।१।१५) सूत्र से 'प्रकृत्या' पद की अनुवृत्ति आती है। तदनुसार प्लुत या प्रगृह्यसंज्ञक पदों के पश्चात् किसी अच् वर्ण के रहने पर प्रकृतिभाव होता है। प्लुतसंज्ञक का निरूपण अच् सन्धि के अन्त में किया जा चुका है। प्रगृह्य संज्ञा का निरूपण आगे किया जायेगा। प्रकृतिभाव होने से सन्धि कार्य नहीं होता। **उदाहरण**—'आगच्छ कृष्ण ३ अत्र गौश्चरति'। यहाँ प्लुतसंज्ञक 'कृष्ण ३' के पश्चात् आने वाले 'अत्र' के अकार के साथ प्रकृतिभाव होने से दीर्घ नहीं हुआ।

(५६) पद—ह्रस्वं लघु। **संज्ञासूत्र।**

मूलार्थ—ह्रस्व की लघुसंज्ञा होती है। (ह्रस्व का तात्पर्य एकमात्रिक स्वर से है)।

(५७) पद—संयोगे, गुरु। **अनुवृत्ति**—ह्रस्वम्। **संज्ञासूत्र।**

मूलार्थ—संयोग (संयुक्ताक्षर) के परे ह्रस्व की गुरु संज्ञा होती है।

(५८) पद—दीर्घ च। **अनुवृत्ति**—गुरु। **संज्ञासूत्र।**

मूलार्थ—दीर्घ अच् की भी गुरु संज्ञा होती है।

(५९) पद—गुरोः, अनृतः, अनन्त्यस्य, अपि, एकैकस्य, प्राचाम्। **अनुवृत्ति**—दूरात् हूते, वाक्यस्य, टेः, प्लुतः। **विधिसूत्र।**

मूलार्थ—दूर से सम्बोधन विषयक वाक्य में सम्बोध्यमान वाचक पद के अवयव ऋकारेतर अन्त्यभिन्न गुरुसंज्ञक स्वरवर्णों को वैकल्पिक प्लुत पर्याय से होता है। (सूत्र में 'प्राचाम्' पद होने से सभी प्लुत प्राचीन आचार्यों के मत में विकल्प से होते हैं)।

विमर्श—उपर्युक्त प्लुतविधान प्राचीन आचार्यों को मान्य है, अन्य को नहीं। अतः विकल्प से प्लुत होता है। पक्ष में वाक्य की 'टि' को प्लुत होता है। **उदाहरण**—(१) 'दे३वदत्त' यहाँ आदि के एकार को गुरु होने के कारण प्लुत हुआ। (२) 'देवद३त्त' यहाँ संयुक्ताक्षर 'त्त' के पूर्व में होने से दकारोत्तरवर्ती अकार गुरुसंज्ञक होने से प्लुत। (३) 'देवदत्त ३' विकल्प होने के कारण पक्ष में 'टि' (अन्तिम अकार) को प्लुत हुआ। **प्रत्युदाहरण**—(१) 'देवदत्त' पद में वकारोत्तरवर्ती अकार को प्लुत न हो, इसलिए सूत्र में गुरु पद का ग्रहण किया गया है 'व' लघु वर्ण है, अन्यथा उसको भी प्लुत हो जाता। (२) इसी प्रकार सूत्र में अनृतः (ऋकार भिन्न) पद विद्यमान होने से 'कृष्ण ३' में ऋकार के गुरुसंज्ञक वर्ण होने पर भी प्लुत नहीं हुआ।

(६०) पद—ईदूदेद्, द्विवचनम् प्रगृह्यम्। **संज्ञासूत्र।**

द्विवचनं प्रगृह्यं स्यात्। हरी एतौ। विष्णू इमौ। गङ्गे अमू। मणीवोष्ट्रस्येति तु इवार्थे वशब्दो वाशब्दो वा बोध्यः। (६१) अदसो मात् १।१।१२। अस्मात्परावीदूतौ प्रगृह्यौ स्तः। अमी ईशा। रामकृष्णावमू आसाते। मात्किम्। अमुकेऽत्र।

विशेषणत्वात् तदन्तविधिः, तदाह—ईदूदेदन्तमित्यादिना। हरी एतौ। अत्र 'ईदूदेद्-द्विवचनमि'त्यादिना प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यमि'त्यनेन प्रकृतिभावे 'हरी एतौ' इति निष्पन्नम्। एवं विष्णू + इमौ, गङ्गे + अमू। ननु 'मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम' इति भारतश्लोके 'मणीव' इत्यत्र 'मणी + इव' इति दशायाम् ईकारस्य प्रगृह्यत्वे सति प्रकृतिभावे सवर्णदीर्घो न स्यादित्यत आह— **मणीवोष्ट्रस्येति।** 'व वा यथा तथैवैवं साम्ये' इत्यमरः। वृत्तिकारस्तु—'मणीवादीनाम्प्रतिषेधो वक्तव्यः' इत्याह। रूपमालायामपि 'मणीवादौ सन्धिरिष्यते' इत्युक्त्वा सन्धिरङ्गीकृतः।

(६१) अदसो मादिति। अदसः षष्ठ्यन्तम्, मादिति पञ्चम्यन्तम्। अदस इत्यत्रावयवषष्ठी तथा च अदश्शब्दावयवमकारादित्यर्थः। 'ईदूदेदि'ति प्रगृह्यमिति चानुवर्तते। मादिति दिग्योगे पञ्चमी। तेन अदश्शब्दावयवमकारात्परावीदूतौ प्रगृह्यौ

मूलार्थ—ईकारान्त, ऊकारान्त एवं एकारान्त द्विवचन की प्रगृह्य संज्ञा होती है। हरी एतौ। विष्णू इमौ। गङ्गे अमू। 'मणीव' में इव के अर्थ में 'व' अथवा 'वा' शब्द जाना जाय।

विमर्श—'प्लुतप्रगृह्या०' इत्यादि सूत्रक्रमानुसार 'प्लुत' के पश्चात् 'प्रगृह्य' संज्ञा का निरूपण किया जा रहा है—

'ईदूदेद्०' सूत्र में ईदूदेद्द्विवचनम्' संज्ञी है तथा 'प्रगृह्य' संज्ञा है। यहाँ तपरकरण होने से द्विमात्रिक 'ई', 'ऊ' तथा 'ए' का ग्रहण होता है। तदनुसार द्विवचन में विद्यमान ईकारान्त, ऊकारान्त और एकारान्त शब्दों की प्रगृह्यसंज्ञा होती है। **उदाहरण**—(१) 'हरी + एतौ' यहाँ हरि शब्द के प्रथमा द्विवचन में दीर्घ से 'हरी' उसके पश्चात् एकार होने से प्रगृह्यसंज्ञा होकर प्रकृतिभाव हुआ। अर्थ—ये सिंह हैं। (२) इसी प्रकार विष्णू + इमौ। इन दोनों उदाहरणों में यण् नहीं हुआ। अर्थ—ये दो विष्णु हैं। (३) 'गङ्गे + अमू' में एकारान्त द्विवचन होने से प्रगृह्यसंज्ञा होकर प्रकृतिभाव हुआ। 'अय्' आदेश नहीं हुआ। अर्थ—ये दो गङ्गा के रूप हैं।

'मणीव' इत्यादि महाभारतोक्त प्रयोगों की सिद्धि के लिए काशिकादि वृत्तिकारों ने प्रगृह्यसंज्ञा का प्रतिषेध स्वीकार किया है। परन्तु महाभाष्यकार तथा वार्तिककार ने ऐसा उल्लेख नहीं किया है। अतः 'मणीवोष्ट्रस्य' इत्यादि शब्दों में सन्धि नहीं है, अपितु उपमानार्थक 'व' अथवा 'वा' शब्द से उनकी साधुता निर्बाध है।

(६१) पद—अदसः मात्। **अनुवृत्ति**—ईदूत्, प्रगृह्यम्। **संज्ञासूत्र।**

मूलार्थ—अदस् शब्द सम्बन्धी मकार से परे ई, ऊ की प्रगृह्यसंज्ञा होती है। अमी ईशाः। रामकृष्णावम् आसाते। सूत्र में 'मात्' पद का ग्रहण क्यों किया? अमुकेऽत्र। 'मात्' ग्रहण न करने पर एकार की भी अनुवृत्ति आने लगेगी।

विमर्श—सूत्रस्थ 'अदसः' पद में अवयवार्थक षष्ठी विभक्ति का प्रयोग हुआ है। पूर्व सूत्र से 'ईत्' 'ऊत्' तथा 'प्रगृह्यम्' की अनुवृत्ति आ रही है। तदनुसार 'अदस्' शब्दावयव मकार से परे

असति माद्ग्रहणे एकारोऽप्यनुवर्तेत । (६२) चादयोऽसत्त्वे १।४।५७ । अद्रव्यार्था-श्चादयो निपातसंज्ञाः स्युः । (६३) प्रादयः १।४।५८ । एतेऽपि तथा ।

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ।।

लिङ्गसङ्ख्यान्वययोग्यं द्रव्यम् । (६४) निपात एकाजनाङ् १।१।१४ । एकोऽज्

स्तः । अमी ईशा इति । 'अमी + ईशाः' इत्यत्र 'अदसो मादि'त्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे 'अमी ईशाः' इति । एवम् 'अमू आसाते' इत्यत्रापि प्रगृह्यसंज्ञा कृत्वा प्रकृतिभावो ज्ञेयः । मात्किमिति । असति माद्ग्रहणे एकारोऽप्यनुवर्तेत । तेन च 'अमुकेऽत्र' इत्यत्र प्रगृह्यसंज्ञापूर्वकप्रकृतिभावः स्यात् ।

(६३) **वस्तूपलक्षणं यत्रेति ।** द्रव्यपदं वस्तूपलक्षणम् । वस्तूपलक्ष्यते परामृश्यते =ज्ञायते येन तत्सर्वनाम यत्र परामर्शाय=ज्ञानाय प्रयुज्यते सोऽर्थो द्रव्यमित्युच्यते अथवा भेद्यत्वेन लिङ्गसङ्ख्यानिरूपितविशेष्यत्वेन विवक्षित इत्यर्थः ।

(६४) **निपात इति ।** प्रगृह्यमित्यनुवर्तते पुँल्लिङ्गतया च विपरिणम्यते

'ई' तथा 'ऊ' की प्रगृह्य संज्ञा होती है । **उदाहरण**—(१) (अदस्+जश, —अद+ई=अमी अमी+ईशाः प्रगृह्यसंज्ञा होने से प्रकृतिभाव, दीर्घ नहीं हुआ । (२) अमू आसाते । यहाँ भ प्रगृह्यसंज्ञा और प्रकृतिभाव होने से यण् नहीं हुआ । **प्रत्युदाहरण**—सूत्र में यदि 'मात्' पद क ग्रहण न होता तो एकार की भी अनुवृत्ति आने से अदश्शब्दावयव 'ई', 'ऊ' तथा 'ए' की प्रगृ संज्ञा होने के फलस्वरूप 'अमुकेऽत्र' में भी प्रगृह्यसंज्ञा प्राप्त होने लगेगी । प्रकृतिभाव होने पूर्वरूप नहीं होगा । 'मात्' पद के ग्रहण से अदस् शब्दावयव मकार के अनन्तर 'ई' तथा 'ऊ के ही मिलने से एकार की अनुवृत्ति नहीं आती ।

(६२) पद—चादयः, असत्त्वे । **संज्ञासूत्र ।**

मूलार्थ—अद्रव्यार्थक चादि निपातसंज्ञक होते हैं ।

विमर्श—'प्रागीश्वरान्निपाताः' सूत्र 'निपात' का अधिकार होने से' संज्ञा' का लाभ होता है सूत्र में चादयः (च वा ह इत्यादि गणपठित शब्द) संज्ञी हैं । 'सत्त्व' शब्द का अर्थ पदार्थ है जिसमें लिङ्ग, संख्या का अन्वय होता है ।[1] अद्रव्य में लिङ्ग, संख्या की प्रतीति नहीं होती । अत अद्रव्यार्थक चादिगणपठित शब्द निपातसंज्ञक होते हैं ।

(६३) पद—प्रादयः । **अनुवृत्ति**—असत्त्वे, निपाताः । **संज्ञासूत्र ।**

मूलार्थ—अद्रव्यार्थक प्र आदि शब्दों की भी निपातसंज्ञा होती है ।

विमर्श—सूत्र के अन्तर्गत 'प्रादयः' संज्ञी है । (प्र आदिर्येषां ते प्रादयः-बहुव्रीहि) पू सूत्र से 'असत्त्वे' और 'निपाताः' की अनुवृत्ति आ रही है । तदनुसार द्रव्य से भिन्न अर्थ वाले परा आदि २२ शब्दों की निपातसंज्ञा होती है ।

द्रव्य का लक्षण—वस्तूपलक्षमित्यादि । जहाँ किसी वस्तु के ज्ञान के लिए सर्वनाम (स अयम्, इदम् इत्यादि) का प्रयोग किया जाता है । विशेष्यत्वेन विवक्षित वह वस्तु 'द्रव्य कहलाती है । (लिङ्ग संख्याद्यन्वयोग्य द्रव्य होता है) ।

(६४) पद—निपात, एकाच्, अनाङ् । **अनुवृत्ति**—प्रगृह्यम् । **संज्ञासूत्र ।**

---

१. सत्त्वमिति द्रव्यमुच्यते । लिङ्गसङ्ख्यान्वितं द्रव्यम् ।

निपात आङ्वर्जः प्रगृह्यः स्यात् । इ इन्द्रः । उ उमेशः । (वाक्यस्मरणयोरङित्) । आ एवं नु मन्यसे । आ एवं किल तत् । अन्यत्र ङित् । ईषदुष्णम् । ओष्णम् । (६५) ओत् १।१।१५ । ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः । (६६) सम्बुद्धौ शाकल्यस्येतावनार्षे १।१।१६ । सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ

एकश्चासावच्चेति कर्मधारयः । चादित्वात् 'इ' निपातः । स चाश्चर्येऽस्ति । 'उ' वितर्के । इ + इन्द्रः । उ + उमेशः । उभयत्राप्यनेन प्रगृह्यसंज्ञायां प्रकृतिभावे सन्ध्यभावः । **वाक्यस्मरणयोरिति ।** ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमात्रं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥' **अन्यत्रेति ।** वाक्यस्मरणार्थकभिन्ने इत्यर्थः । तेन आ + उष्णमित्यत्र गुणः । ईषदुष्णमित्यर्थनिर्देशः ।

(६६) **सम्बुद्धौ शाकल्यस्येति ।** सम्बुद्धाविति । निमित्तसप्तमी अनुवृत्तेन आदित्य-

---

मूलार्थ—'आङ्' को छोड़कर एक अच् रूप निपात की प्रगृह्य संज्ञा होती है । इ इन्द्रः । उ उमेशः । (वाक्य और स्मरण में 'आ' ङकारेत्संज्ञक नहीं होता) आ एवं नु मन्यसे । आ एवं किल तत् । वाक्य और स्मरण अर्थ के अतिरिक्त अन्य अर्थों में 'आ' ङित् होता है । ईषत् (थोड़ा) उष्णम्=ओष्णम् ।

विमर्श—सूत्र में 'अनाङ्, एकाच्, निपातः' संज्ञी हैं । 'प्रगृह्य' संज्ञा है । तदनुसार 'आङ्' से भिन्न (न आङ्=अनाङ्) एक अच् रूप (एकश्चासौ अच्च एकाच्, कर्मधारय) निपात प्रगृह्यसंज्ञक होते हैं । प्रगृह्यसंज्ञा का फल 'प्लुतप्रगृह्या अचि नित्यम्' सूत्र से प्रकृतिभाव होना है । **उदाहरण**—(१) 'इ+इन्द्रः' (यहाँ विस्मयार्थक इ निपात की प्रगृह्यसंज्ञा होने से प्रकृतिभाव होकर दीर्घसन्धि नहीं हुई । अर्थ—अरे ! इन्द्र हैं । (२) 'उ+उमेशः' (यहाँ वितर्कार्थक उ निपात की प्रगृह्यसंज्ञा होने से प्रकृतिभाव) दीर्घसन्धि नहीं हुई । अर्थ—क्या यह शिव हैं ।

ईषत् अर्थ (थोड़ा) में, क्रिया के योग में, मर्यादा और अभिविधि अर्थ में 'आ' ङकारेत्संज्ञक है । अन्यत्र—अर्थात् वाक्य और स्मरण अर्थ में 'आ' ङित् नहीं है ।[1] अतः (३) 'आ एवं नु मन्यसे' में 'आ' को प्रगृह्यसंज्ञा होने से प्रकृतिभाव । वृद्धि सन्धि नहीं हुई । अर्थ—आप, ऐसा समझने लगे । (४) 'आ एवं किल तत्' यहाँ भी प्रगृह्यसंज्ञा तथा प्रकृतिभाव होने से वृद्धि सन्धि नहीं हुई । अर्थ—मुझे स्मरण है कि यह बात ऐसी ही है । वाक्य और स्मरण के अतिरिक्त अन्य अर्थों में 'आ' के 'ङित्' होने के कारण प्रगृह्यसंज्ञा नहीं होती । अतः 'ईषत्' अर्थ में प्रयुक्त आ+उष्णम्='ओष्णम्' में गुणसन्धि हुई । अर्थ—थोड़ा गरम है ।

(६५) पद—ओत् । **अनुवृत्ति**—निपातः, प्रगृह्यम् । **संज्ञासूत्र ।**

मूलार्थ—ओदन्त निपात प्रगृह्य संज्ञक होता है ।

विमर्श—सूत्र में 'ओत्, निपातः' संज्ञी हैं तथा 'प्रगृह्य' संज्ञा । सूत्रस्थ 'ओत्' पद अनुवृत्त पद 'निपातः' का विशेषण है । अतः तदन्त विधि होने से ओकारान्त निपातसंज्ञक शब्दों की प्रगृह्यसंज्ञा होती है । **उदाहरण**—'अहो+ईशाः' यहाँ 'अहो' ओकारान्त निपात होने से प्रगृह्य संज्ञा और प्रकृतिभाव होकर अहो ईशाः । अय् आदेश नहीं हुआ । अर्थ—अहो ! देवगण हैं ।

(६६) पद—सम्बुद्धौ, शाकल्यस्य, इतौ, अनार्षे । **अनुवृत्ति**—ओत्, प्रगृह्यम् । **संज्ञासूत्र ।**

---

१. ईषदर्थे क्रियायोगे मर्यादादभिविधौ च यः । एतमात्रं ङितं विद्याद् वाक्यस्मरणयोरङित् ॥

परे। विष्णो इति। विष्णविति। विष्ण इति। अनार्षे इति किम्? ब्रह्मबन्धवित्यब्रवीत्। **(६७) मय उञो वो वा ८।३।३३।** मयः परस्य उञो वो वा स्यादचि। किमु उक्तम्। किम्वुक्तम्। **(६८) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६।१।१२७।**

नेनान्वेति। प्रगृह्यमनुवर्त्य पुंल्लिङ्गतया विपरिणम्यते। **विष्णो इति।** 'विष्णो + इति' इति स्थितौ 'सम्बुद्धौ शाकल्येतावनार्षे' इत्यनेन सम्बुद्धिनिमित्तकस्योकारस्य अवैदिके इतौ परे विकल्पेन प्रगृह्यसंज्ञायां 'प्लुतप्रगृह्या अचि नित्यमि'त्यनेन प्रकृतिभावे 'विष्णो इति' रूपम्। प्रगृह्यसंज्ञाभावे 'एचोऽयवायावः' इत्यनेन अवादेशे 'लोपः शाकल्यस्य' इत्यनेन वकारस्य विकल्पेन लोपे 'विष्ण इति' रूपम्, लोपाभावे च 'विष्णविति' रूपम्।

(६७) 'ङमो ह्रस्वादचि०' इत्यत अचीत्यनुवर्तते तदाह—**मय** इत्यादि।

(६८) **इकोऽसवर्ण इति।** इकः' इति षष्ठ्यन्तम्। 'एङः पदान्तादि'त्यतः

मूलार्थ—सम्बुद्धि निमित्तक ओकार की विकल्प से प्रगृह्यसंज्ञा होती है, अवैदिक 'इति' शब्द के परे रहते।

विमर्श—'सम्बुद्धौ' शब्द में सप्तमी विभक्ति निमित्त अर्थ में हुई है। पाणिनीय व्याकरणशास्त्र में सम्बोधन के एकवचन को 'सम्बुद्धि' कहते हैं।[1] तदनुसार सम्बोधन के एकवचन को मानकर होने वाले (सम्बुद्धिनिमित्तक) ओकार के पश्चात् वैदिक प्रयोग से भिन्न 'इति' शब्द के होने पर आचार्य शाकल्य के मत में प्रगृह्यसंज्ञा होती है, अन्य आचार्यों के मत में नहीं। **उदाहरण**—(१) विष्णो+इति। यहाँ विष्णु शब्द का सम्बोधन के एकवचन में 'ह्रस्वस्य गुणः' सूत्र से गुण होकर 'विष्णो' रूप बना है। इस प्रकार सम्बुद्धि-निमित्तक 'ओ' होने से प्रगृह्यसंज्ञा और प्रकृतिभाव हुआ। (२) विकल्प होने से पक्ष में—अवादेश (ओ=अव्)—विष्णव् इति, 'लोपः शाकल्यस्य' से विकल्प से वकार का लोप होने से विष्ण इति। (३) व् का लोप न होने पर—विष्णविति। अर्थ—हे विष्णो! इस प्रकार। **प्रत्युदाहरण**—सूत्र में 'अनार्षे' (वेद से भिन्न) पद होने के कारण 'ब्रह्मबन्धो+इति' में प्रगृह्यसंज्ञा नहीं हुई। क्योंकि यहाँ 'इति' वैदिक पद परे है। अतः ओ=अव् आदेश ब्रह्मबन्ध् अव् इत्यब्रवीत्=ब्रह्मबन्धवित्यब्रवीत्। वैदिक पद होने के कारण यहाँ वकार का लोप भी नहीं हुआ। अर्थ—हे ब्रह्मबन्धो! ऐसा कहा।

(६७) पद—मयः, उञः, वः, वा। **अनुवृत्ति**—अचि। **विधिसूत्र।**

मूलार्थ—मय से परे 'उञ्' के स्थान में वकार आदेश विकल्प से होता है, अच् वर्ण परे रहते। किमु उक्तम्। किम्वुक्तम्।

विमर्श—प्रकृत सूत्र में 'ङमो ह्रस्वादचि ङमुण् नित्यम्' (८।३।३२) सूत्र से 'अचि' की अनुवृत्ति आती है। 'मयः' पञ्चम्यन्त पद है। 'उञ्' अव्यय है। तदनुसार मय प्रत्यहारस्थ वर्ण के अनन्तर 'उञ्' (उ) के स्थान पर अच् परे रहते 'व्' आदेश विकल्प से होता है। **उदाहरण**—किमु+उक्तम् (उ=व्)—किम् व् उक्तम्=किम्वुक्तम्। पक्ष में किमु उक्तम्। (पक्ष में 'निपात एकाजनाङ्' से प्रगृह्यसंज्ञा होकर प्रकृतिभाव)।

(६८) पद—इकः, असवर्णे, शाकल्यस्य, ह्रस्वः च। **अनुवृत्ति**—पदान्तात्, अचि। **विधिसूत्र।**

---

१. 'एकवचनं सम्बुद्धिः' (पा० सू० २।३।४९)

पदान्ता इको ह्रस्वाः प्रकृत्या च वा स्युरसवर्णेऽचि । ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः । चक्रि अत्र । चक्र्यत्र । पदान्ताः किम् ? गौर्यौ । (न समासे) वाप्यश्वः । (६९) ऋत्यकः ६।१।१२८ । ऋति परे पदान्ता अकः प्राग्वत् । ब्रह्म ऋषिः । ब्रह्मर्षिः । पदान्ताः किम् ? आर्च्छत् । इति स्वरसन्धिः ।

पदान्तादित्यनुवर्तते, तच्च षष्ठ्यन्ततया विपरिणम्यते । अचीत्यनुवर्तते । चकारात् 'प्रकृत्यान्तः पादमि'त्यतः प्रकृत्येत्यनुकृष्यते । तदाह—पदान्ता इत्यादि । अत्र 'ह्रस्व-विधिसामर्थ्यादेव प्रकृतिभावे सिद्धे तदनुकर्षणार्थश्चकारो न कर्तव्यः इति भाष्यकारः । **वाप्यश्व इति ।** वाप्यामश्वः 'वाप्यश्वः' । अत्र 'वापी + अश्वः' इत्यवस्थायां 'इकोऽसवर्णे०' इत्यनेन ह्रस्वसमुच्चितप्रकृतिभावे प्राप्ते 'न समासे' इति वार्तिकेन तन्निषेधे यणि कृते 'वाप्यश्वः' इति ।

(६९) **ऋत्यक इति ।** ऋति सप्तम्यन्तम्, अकः षष्ठ्यन्तम् । 'एङः पदान्तादि'त्यतः पदान्तादित्यनुवर्तते, तच्च षष्ठ्यन्ततया विपरिणम्यते । शाकल्यस्य ह्रस्वश्चेत्यनुवर्तते । 'असवर्णे' इति निवृत्तम् । तदाह ऋति परे इत्यादि । ब्रह्म ऋषि

सूत्रार्थ—पदान्त 'इक्' को असवर्ण अच् परे रहते विकल्प से प्रकृतिभाव और ह्रस्व होता है । यहाँ ह्रस्व-विधान सामर्थ्य से सन्धिकार्य (यण्) नहीं होता । चक्रि अत्र । चक्र्यत्र । 'पदान्ताः' क्यों कहा ?—गौर्यौ । समास में नहीं होता । वाप्यश्वः ।

विमर्श—यहाँ 'एङः पदान्तादति' (६।१।१०९) सूत्र से 'पदान्तात्' पद की अनुवृत्ति आती है, वह षष्ठी विभक्ति में परिवर्तित होकर 'इकः' का विशेषण हो जाता है । 'च' से 'प्रकृत्या' पद का अनुकर्षण होता है । अतः पदान्त में विद्यमान 'इक्' (इ, उ, ऋ, ऌ) वर्णों के अनन्तर सवर्ण भिन्न अच् वर्णों के रहने पर आचार्य शाकल्य के मत में 'इक्' वर्ण को ह्रस्व हो जाता है तथा प्रकृतिभाव भी । अर्थात् इन ह्रस्व वर्णों को सन्धिकार्य नहीं होता । **उदाहरण**—(१) चक्री + अत्र = चक्रि अत्र—यहाँ पद के अन्त में दीर्घ ईकार के पश्चात् 'ई' से भिन्न अच् 'अ' होने के कारण ह्रस्व तथा प्रकृतिभाव हुआ । पक्ष में (अन्य आचार्यों के मत में) यण्—चक्र्यत्र । **प्रत्युदाहरण**—सूत्र में 'पदान्त इक्' कहने से 'गौरी + औ' में ह्रस्व तथा प्रकृतिभाव नहीं हुआ । क्योंकि यहाँ ईकार पद के अन्त में नहीं है । यण् होकर 'गौर्यौ' बना ।

(वा०)—समास में ह्रस्व और प्रकृतिभाव नहीं होता । **उदाहरण**—'वापी + अश्वः' = वाप्यश्वः । यण् हुआ ।

(६९) पद—ऋति, अकः । **अनुवृत्ति**—पदान्तात्, शाकल्यस्य, ह्रस्वः, प्रकृत्या । **विधिसूत्र ।**

मूलार्थ—ह्रस्व ऋकार परे रहते पदान्त 'अक्' को ह्रस्व और प्रकृतिभाव विकल्प से होता है । ब्रह्म ऋषिः । ब्रह्मर्षिः । 'पदान्त में होता है' ऐसा क्यों कहा ? आर्च्छत् ।

विमर्श—प्रकृत सूत्र में पूर्वसूत्र से 'शाकल्यस्य' 'ह्रस्वः' तथा 'प्रकृत्या' पदों की अनुवृत्ति आती है । 'एङः पदान्तात्०' से अनुवृत्त 'पदान्तात्' पद षष्ठी विभक्ति में परिवर्तित होकर 'अकः' का विशेषण हो जाता है । अतः ह्रस्व ऋकार परे रहने पर पदान्त अक् (अ, इ, उ, ऋ, ऌ) को शाकल्य के मत में ह्रस्व तथा प्रकृतिभाव हो जाता है । अर्थात् ह्रस्व हो जाने पर कोई सन्धि कार्य नहीं होता । **उदाहरण**—ब्रह्मा + ऋषिः = ब्रह्म ऋषिः । यहाँ 'आ' के स्थान पर ह्रस्व तथा

अथ हल्सन्धिः

(७०) स्तोः श्चुना श्चुः ८।४।४० । सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जयः । (७१) शात् ८।४।४४ । शात्परस्योक्तं न स्यात् । विश्नः । प्रश्नः । (७२) ष्टुना ष्टुः

इति । 'ब्रह्मा + ऋषिः' इति स्थितौ गुणं प्रबाध्य 'ऋत्यकः' इत्यनेन ह्रस्वसमुच्चित-प्रकृतिभावे 'ब्रह्म ऋषिः' इति । तदभावपक्षे गुणे रपरे च कृते 'ब्रह्मर्षिः' इति रूपम् ।

इति स्वरसन्धिः ।

---

(७०) **स्तोः श्चुना श्चु इति ।** श्चुनेत्यत्र सहार्थे तृतीया । अत्र स्थान्यादेशानां यथासङ्ख्यं भवति । ततश्च सकारस्य स्थाने शकारः, तवर्गस्य चवर्गः । निमित्तकार्यि-णोस्तु न 'शात्' इति ज्ञापकात् । **हरिशेश्त इति ।** 'हरिस् + शेते' इति स्थिते शकारेण योगात् सकारस्य शकारः । तमस् + चिनोति । सत् + चित् । शार्ङ्गिन् + जयः ।

(७१) **विश्नः, प्रश्न इति ।** 'विश् + नः, प्रश् + न' इत्यत्र पूर्वसूत्रेण नकारस्य श्चुत्वे प्राप्ते 'शात्' इत्यनेन तन्निषिध्यते । अत्र विच्छप्रच्छधातुभ्यां 'यजयाच्०'

प्रकृतिभाव हुआ । गुण नहीं हुआ । पक्ष में (अन्य आचार्यों के मत में) गुण तथा रपर (आ + ऋ = अर्)—ब्रह्म् अर् षिः = ब्रह्मर्षिः । **प्रत्युदाहरण**—सूत्र में 'पदान्तात्' पद की अनुवृत्ति आने से पदान्त भिन्न 'अक्' के स्थान में उक्त कार्य नहीं होता । अतः आर्च्छत् में 'आ + ऋच्छत्' स्थिति में वृद्धि ('आटश्च' से आ + ऋ = आर्) = आर्च्छत् । यहाँ आकार के पदान्त में न होने से ह्रस्व तथा प्रकृतिभाव नहीं हुआ । अर्थ—गया ।

इति स्वरसन्धिः ।

---

(७०) पद—स्तोः, श्चुना श्चुः । **विधिसूत्र ।**

मूलार्थ—सकार—तवर्ग के स्थान में शकार अथवा चवर्ग का योग रहने पर सकार के स्थान में शकार और तवर्ग के स्थान में चवर्ग होता है ।

विमर्श—प्रकृत सूत्र में सकार तथा तवर्ग (त् थ् द् ध् न्) स्थानी हैं तथा शकार और चवर्ग आदेश हैं । इस प्रकार स्थानी और आदेशों की संख्या समान होने के कारण 'यथासंख्य' परिभाषा के द्वारा क्रमशः स् = श्, त् = च्, थ् = छ्, द् = ज्, ध् = झ्, न् = ञ् हो जाते हैं' । योग (साहचर्य) में रहने वाले वर्णों में यथासंख्य परिभाषा का नियम प्रवृत्त नहीं होता । **उदाहरण**—(१) हरिस् + शेते (स् = श्—'श्' के योग में)—हरिश्शेते । अर्थ—हरि सोता है । (२) रामस् + चिनोति (स् = श्—'च्' के योग में)—रामश्चिनोति । अर्थ—राम चुनता है । (३) सत् + चित् (त् = च्—'च्' के योग में)—सच्चित् । अर्थ—सत् और चित् रूप । (४) शार्ङ्गिन् + जय (न् = ञ्—'ज्' के योग में)—शार्ङ्गिञ्जयः । अर्थ—हे विष्णु, तुम्हारी जय हो ।

(७१) पद—शात् । **अनुवृत्ति**—न, तोः, चुः । **विधिसूत्र** (निषेध) ।

मूलार्थ—शकार से परे तवर्ग को श्चुत्व नहीं होता ।

८।४।४१ । स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे । (७३) न पदान्ताट्टोरनाम् ८।४।४२ । 'अनामि'ति लुप्तषष्ठीकम्पदम् । पदान्ताट्टवर्गात्परस्याऽनामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात्किम् ? ईट्टे । टोः किम् ? सर्पिष्टमम् । अनाम्नवतिनगरीणामिति वाच्यम् । षण्णाम् ।

इति नङ्प्रत्यये 'च्छ्वोः शूडनुनासिके चे'ति शत्वम् । 'गृहिज्ये'ति सम्प्रसारणन्तु न भवति 'प्रश्ने चासन्नकाले' इति निर्देशात् ।

(७२) **ष्टुना ष्टुरिति** । अत्र 'स्तोः' इत्यनुवर्तते । 'रामस् + षष्ठः' इत्यत्र 'ष्टुना ष्टुः' इत्यनेन षकारयोगेन सकारस्य षकारादेशे 'रामष्षष्ठः' इति । एवम् रामस् + टीकते, पेष् + ता, तत् + टीका, चक्रिन् + ढौकसे ।

(७३) अनामिति लुप्तषष्ठ्यन्तं पदम् । स्तोः ष्टुरित्यनुवर्तते । षट् + सन्तः, षट् + ते इत्यत्र टवर्गस्य पदान्ते वर्तमानत्वान्न ष्टुत्वम् । पदान्तादित्यस्याभावे तु— 'ईट् + ते' इत्यत्रापि ष्टुत्वनिषेधः स्यात् । **टोः किमिति** । 'सर्पिष् + तमम्' इत्यत्र ष्टुत्वे 'नपदान्तादि'ति सूत्रेण निषेधो न भवति, पदान्ताट्टवर्गात्परत्वाभावात् । टोः ग्रहणाभावे तु सन्नियोगशिष्टानामि'ति परिभाषया ष्टुरिति समुदायस्यानुवृत्तौ

विमर्श—प्रकृत सूत्र में 'न पदान्ताट्टोरनाम्' (८।४।४२) से 'न', 'तोः षि' (८।४।४३) से 'तोः' और 'स्तोः श्चुना श्चुः' (८।४।४०) से 'श्चुः' पदों की अनुवृत्ति आती है। तदनुसार शकार के अनन्तर विद्यमान तवर्ग के स्थान पर च वर्ग नहीं होता है। **उदाहरण**—(१) विश्+नः (यहाँ 'श्' के बाद 'न्' के स्थान पर पूर्वसूत्र से प्राप्त चुत्व ('ञ्') नहीं हुआ)—विश्नः । (२) प्रश्+नः (यहाँ भी श्चुत्व निषेध होकर)—प्रश्नः ।

(७२) पद—ष्टुना ष्टुः । **अनुवृत्ति**—स्तोः । **विधिसूत्र** ।

मूलार्थ—सकार—तवर्ग के स्थान में षकार टवर्ग का योग रहने पर षकार—टवर्ग होते हैं ।

विमर्श—'स्तोः श्चुना श्चुः' (८।४।४०) सूत्र से 'स्तोः' पद की अनुवृत्ति आती है। इस प्रकार सकार तथा तवर्ग (त्, थ्, द्, ध्, न्) के स्थान में क्रमशः षकार तथा टवर्ग (ट् ठ् ड्, ढ्, ण्) आदेश होते हैं। ष् और टवर्ग में से किसी वर्ण का योग पूर्व या पर में रहे तो भी ष्टुत्व होता है। **उदाहरण**—(१) रामस्+षष्ठः (स्=ष्—'ष्' के योग में)=रामष्षष्ठः । अर्थ—राम छठवाँ है। (२) रामस्+टीकते (स्=ष्—'ट्' के योग में)=रामष्टीकते । अर्थ—राम जाता है। (३) पेष्+ता (त्=ट्—'ष्' के योग में)=पेष्टा । अर्थ—पीसने वाला । (४) तत्+टीका (त्=ट्—'ट' के योग में)=तट्टीका । अर्थ—उसकी टीका । (५) चक्रिन्+ढौकसे (न्=ण्—'ढ्' के योग में)=चक्रिण्ढौकसे । अर्थ—हे चक्रधारी (कृष्ण) तुम जाते हो ।

(७३) पद—न, पदान्तात्, टोः, अनाम् । **अनुवृत्ति**—स्तोः, ष्टुः । **विधिसूत्र** (निषेध) ।

मूलार्थ—पदान्त टवर्ग से परे नाम् भिन्न सकार तथा तवर्ग को ष्टुत्व नहीं होता । (वा०)—पदान्त टवर्ग से परे नाम्, नवति, नगरी भिन्न सकार तवर्ग को ष्टुत्व नहीं होता, ऐसा कहना चाहिए ।

विमर्श—पूर्वसूत्रों से 'स्तोः' तथा 'ष्टुः' पदों की अनुवृत्ति आती है। सूत्रस्थ 'अनाम्' पद में षष्ठीविभक्ति का लोप स्वीकार किया जाता है। अर्थात् 'नाम्' के विषय में निषेध नहीं होता ।

षण्णवतिः । षण्णगर्यः । (७४) तोः षि ८।४।४३ । तवर्गस्य षकारे परे न ष्टुत्वम् । सन्षष्ठः । (७५) झलां जशोऽन्ते ८।२।३९ । पदान्ते झलां जशः स्युः । वागीशः ।

पदान्ताभ्यां षकारटवर्गाभ्यां परस्येत्याद्यर्थे 'सर्पिष्टममि'त्यत्रापि ष्टुत्वनिषेधः स्यादिति तद्वारणाय टोर्ग्रहणम् । **अनामिति ।** नाम्–नवति–नगरीभिन्नानां ष्टुत्वनिषेध इत्यर्थः । षण्णामिति । 'षष्+नाम्' इत्यत्र पदान्तत्वात् षस्य जश्त्वेन डकारे 'प्रत्यये भाषायां नित्यम्' इत्यनेन णकारे टवर्गयोगात् नकारस्य ष्टुत्वम्, 'नपदान्तादि'ति निषेधस्तु न 'अनामि'ति पर्युदासात् ।

(७४) तवर्गस्य सकारे परे ष्टुत्वं न भवतीत्यर्थः, तेन 'सन्+षष्ठः' इत्यत्र नकारस्य सकारे परे न ष्टुत्वमिति ।

(७५) **झलां जशोऽन्त इति ।** पदस्येत्यधिकृतम्, तच्चान्त इत्यस्य विशेषणम् ।

इस प्रकार सूत्रार्थ होगा—पद के अन्त में टवर्ग के अनन्तर स् तथा तवर्ग के स्थान पर पूर्वसूत्र से प्राप्त क्रमशः ष् तथा टवर्ग (ष्टुत्व) नहीं होता । **उदाहरण**—(१) षष्+सन्तः—(ष्=ड्, ड्=ट्)—षट्+सन्तः (ट् के पश्चात् स् को षत्व निषेध)=षट् सन्तः । अर्थ—छः सज्जन । (२) षट्+ते (ट् के पश्चात् 'त्' को ट् नहीं हुआ) षट् ते । अर्थ—वे छः हैं । **प्रत्युदाहरण**—(१) सूत्र में 'पदान्तात्' पद होने के कारण पदान्त भिन्न टवर्ग के अनन्तर आने वाले स् तथा तवर्ग के स्थान पर क्रमशः षकार तथा टवर्ग होते हैं । अतः 'ईड्+ते' (ड्=ट्)=ईट्+ते प्रकृत सूत्र द्वारा निषेध न किये जाने पर ष्टुत्व (त=ट) हो गया । ईट्टे । (२) सूत्र में 'टोः' पद का ग्रहण न करने पर 'ष्टुना ष्टुः' सूत्र से 'ष्टुना' पद की अनुवृत्ति आती । तदनुसार पदान्त ष् तथा टवर्ग के अनन्तर स् एवं तवर्ग को ष्टुत्व निषेध होने लगता । 'सर्पिष्+तमम्' में भी ष्टुत्व निषेध होता, जो अभीष्ट नहीं है । अतः 'टोः' पद का ग्रहण किया गया है । इस प्रकार सर्पिष्+तमम् (ष् के अनन्तर 'त' को ष्टुत्व—त=ट्)=सर्पिष्टमम् ।

(वा०)—सूत्रकार पाणिनि ने केवल 'नाम्' के न् को ण् (ष्टुत्व) होने का विधान किया था परन्तु वार्तिककार ने 'नाम्' के अतिरिक्त 'नवति' तथा 'नगरी' शब्द के भी पदान्त टवर्ग के अनन्तर 'न्' को 'ण्' होने का विधान किया है । **उदाहरण**—(१) षड्+नवति ('न्'='ण्', पुनः 'यरोऽनुनासिकेऽनुनासिको वा' से 'ड्'='ण्')=षण्णवतिः । पक्ष में षड् नवतिः । अर्थ—छियानबे । (२) षड्+नगर्यः । ('न'=ण्, पूर्ववत् 'ड्'=ण्)=षण्णगर्यः । पक्ष में षड् नगर्यः । अर्थ—छह नगरी) । (३) षड्+नाम् ('न्'=ण् पुनः पूर्ववत् 'ड्'=ण्)=षण्णाम् ।

(७४) पद—तोः षि । **अनुवृत्ति**—न, ष्टुः । **विधिसूत्र** (निषेध) ।

मूलार्थ—षकार परे रहने पर तवर्ग को ष्टुत्व नहीं होता ।

विमर्श—प्रकृत सूत्र में 'नपदान्तात्०' से 'न' तथा 'ष्टुना ष्टुः' से 'ष्टुः' की अनुवृत्ति आती है । तदनुसार षकार परे रहने पर तवर्ग को टवर्ग नहीं होता । **उदाहरण**—सन्+षष्ठः (ष्टुत्व निषेध होने से तवर्ग (न्) के अनन्तर 'ष्' होने से 'ण्' नहीं हुआ)=सन् षष्ठः ।

(७५) पद—झलां, जशः, अन्ते । **अनुवृत्ति**—पदस्य । **विधिसूत्र ।**

मूलार्थ—पद के अन्त में झल् वर्णों के स्थान पर जश् आदेश होते हैं ।

विमर्श—प्रकृत सूत्र में 'पदस्य' का अधिकार होने से पद के अन्त में विद्यमान झल् प्रत्याहार

चिद्रूपम् । (७६) यरोऽनुनासिकेऽनुनासिको वा ८।४।४५ । यरः पदान्तस्याऽनुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः । एतद्मुरारि । स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते । चतुर्मुखः । (प्रत्यये भाषायां नित्यम्) । तन्मात्रम् ।

वागीश इति । 'वाक्+ईशः' इत्यत्र 'झलां जशोऽन्ते' इत्यनेन 'क्' इत्यस्य स्थाने गकारादेशे (जश्त्वे) वागीश इति ।

(७६) न पदान्तादित्यतः पदान्तादित्यनुवर्तते, तच्च षष्ठ्यन्ततया विपरिणम्यते । **स्थानप्रयत्नाभ्यामिति** । ननु 'चतुर्मुखः' इत्यत्रापि रेफस्यानुनासिको णकारः स्यात् स्थानसाम्यादिति चेन्न, स्थानप्रयत्नाभ्यां सदृशतमे 'षण्मुखः' इत्यत्र चारितार्थ्यात् । केवलं स्थानसादृश्यमादाय 'चतुर्मुखः' इत्यत्र न प्रवर्तत इति । अथवा 'अनुस्वारस्य ययि' इत्यतः सवर्णपदमपकृष्य सवर्णोऽनुनासिको भवतीति सूत्रार्थः । 'रेफोष्मणां सवर्णा न सन्ती'ति भाष्यानुसारेण रेफस्य कश्चित्सवर्णो नास्तीति नात्र

बोध्य वर्णों के स्थान में जश् (वर्गों के तृतीय व्यञ्जन वर्ण—ज् ब् ग् ड् द्) आदेश होता है। **उदाहरण**—(१) वाक्+ईशः (क्=ग्)—वागीशः । अर्थ—बृहस्पति । (२) चित्+रूपम् (त्=द्)—चिद्रूपम् । अर्थ—ज्ञान स्वरूप ।

(७६) पद—यरः, अनुनासिके, अनुनासिकः, वा । **अनुवृत्ति**—पदान्तात् । **विधिसूत्र ।**

मूलार्थ—पदान्त 'यर्' को विकल्प से अनुनासिक होता है (अपने वर्ग का पञ्चम वर्ण) यदि उसके बाद कोई अनुनासिक वर्ण हो तो ।

विमर्श—'न पदान्तात्०' से अनुवृत्त पदान्तात् पद को 'यरः' स्थानी के अनुसार षष्ठी विभक्ति में परिवर्तित कर दिया जाता है। तदनुसार पद के अन्तिम यर् प्रत्याहार बोध्य वर्ण के अनन्तर वर्गों के पञ्चम वर्ण (अनुनासिक) रहने पर स्थानी का सजातीय पञ्चम वर्ण (अनुनासिक) होता है। **उदाहरण**—एतद्+मुरारिः ('द्'-यर् के अनन्तर अनुनासिक (म्) रहने पर द्=न्)—एतन्मुरारिः । विकल्प होने से पक्ष में एतद् मुरारिः । अर्थ—यह मुरारि हैं ।

यह अनुनासिक विधि स्थान और प्रयत्न सादृश्य से अत्यन्त सदृश स्पर्श वर्णों में (ट, ठ, ड इत्यादि में) चरितार्थ हो चुकी है। अतः रेफ में प्रवृत्त नहीं होती, तदनुसार 'चतुर्मुखः' में णकार नहीं हुआ ।

आशय यह है कि 'चतुर्+मुखः' में प्रकृत सूत्र से 'र्' के स्थान में अनुनासिक ण् की प्राप्ति होती है, क्योंकि यहाँ यर् (र्) के अनन्तर अनुनासिक 'म्' वर्ण है। इन दोनों वर्णों का मूर्धा स्थान भी समान है। इस शङ्का के समाधानार्थ 'स्थानेऽन्तरतमः' सूत्र में सप्तमी विभक्ति युक्त पाठ स्वीकार करने से सदृशतम स्थानी में ही आदेश स्वीकार किया जाता है। अतः स्थान और प्रयत्न दोनों का ही सादृश्य अपेक्षित है। ऐसा अत्यन्त सादृश्य 'षड्+नाम्' में है। जैसे—'ड्' का मूर्धा स्थान और 'स्पृष्ट' आभ्यन्तरप्रयत्न है, वैसा ही अनुनासिक वर्णों में 'ण्' का है। अतः 'ड्' के स्थान में 'ण्' होकर 'षण्णाम्' की सिद्धि हुई। इस प्रकार सूत्र की चरितार्थता में सदृशतम उदाहरणों के मिलने से केवल मूर्धा स्थान की समानता होने पर 'र्' के स्थान में अनुनासिक 'ण्' नहीं होता । **अथवा**—'अनुस्वारस्य ययि' सूत्र से स्वरितत्व प्रतिज्ञा बल से एकदेश सवर्ण का अपकर्षण कर 'यर् के स्थान में सवर्ण अनुनासिक विकल्प से होता है अनुनासिक परे रहते'

चिन्मयम् । (७७) तोर्लि ८।४।६० । तवर्गस्य लकारे परे परसवर्णः स्यात् । तल्लयः विद्वाँल्लिखति । नस्याऽनुनासिको लः । (७८) उदः स्थास्तम्भोः पूर्वस्य ८।४।६१ । उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् । (७९) तस्मादित्युत्तरस्य १।१।६७ । पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् । (८०) आदेः

काचिदापत्तिः, प्रकृतसूत्राप्राप्तेः । **प्रत्यये भाषायामिति** । अनुनासिकादौ प्रत्यये परे लोके नित्यमनुनासिकः स्यादित्यर्थः । तद् + मात्रम् । चित् + मयम् ।

(७७) **तोर्लीति** । 'अनुस्वारस्य ययि' इत्यतः परसवर्ण इत्यनुवर्तते ।

(७८) **उद इति** । 'अनुस्वारस्ये'त्यतः सवर्णमिह सम्बध्यते, एकदेशे स्वरितत्वप्रतिज्ञानात् । 'उदः' इति पञ्चम्यन्तत्वेन 'तस्मादित्युत्तरस्ये'ति परिभाषया उदः-परयोरिति लभ्यते ।

अर्थ किया जाता है। चूँकि रेफ का कोई सवर्ण नहीं है।[1] अतः 'चतुर्मुखः' में प्रकृत सूत्र की प्राप्ति नहीं होती।

(वा०)—प्रत्यय के अवयव अनुनासिक वर्ण परे रहते पदान्त यर् को नित्य अनुनासिक होता है, भाषा (अवैदिक प्रयोग) में। **उदाहरण**—(१) तद्+मात्रम् ('द्'='न'—यहाँ तद् शब्द के पश्चात् मात्रच् प्रत्यय का प्रथम वर्ण 'म्' अनुनासिक होने से नित्य अनुनासिक हुआ।) तन्मात्रम्। अर्थ—उतना ही। (२) चित्+मयम् ('त्'='न्'—चित् शब्द के अनन्तर मयट् प्रत्यय होने से नित्य अनुनासिक) चिन्मात्रम्। अर्थ—चेतनस्वरूप।

(७७) पद—तोः लि। **अनुवृत्ति**— परसवर्णः। **विधिसूत्र।**

मूलार्थ—तवर्ग को लकार परे रहते परसवर्ण होता है। तल्लयः। विद्वाँल्लिखति। नकार के स्थान पर अनुकासिक लकार हुआ।

विमर्श—'अनुस्वारस्य ययि' (८।४।५८) सूत्र से 'परसवर्णः' की अनुवृत्ति आती है। तदनुसार तवर्ग=त, थ्, द्, ध्, न् के स्थान पर लकार परे रहने पर लकार का सजातीय वर्ण होता होता है। **उदाहरण**—(१) तद्+लयः (द्=ल्)—तल्लयः। अर्थ—उसका लय। (२) विद्वान्+लिखति (अनुनासिक 'न्' के स्थान पर सानुनासिक 'लँ्' होने से)= विद्वाँल्लिखति। अर्थ—विद्वान् लिखता है।

(७८) पद—उदः, स्थास्तम्भोः, पूर्वस्य। **अनुवृत्ति**—सवर्णः। **विधिसूत्र।**

मूलार्थ—उद् से परे 'स्था' और 'स्तम्भ्' को पूर्व सवर्ण होता है।

(७९) पद—तस्माद्, इति, उत्तरस्य। **अनुवृत्ति**—निर्दिष्टे। **परिभाषासूत्र।**

मूलार्थ—पञ्चमी विभक्ति के निर्देश से किये जाने वाला कार्य वर्णान्तर के व्यवधान से रहित परवर्ण के स्थान में होता है।

विमर्श—प्रकृत सूत्रस्थ 'तस्मात्' पद से शब्दस्वरूप का ग्रहण न होकर पञ्चमी विभक्ति रूप अर्थ लिया जाता है। 'तस्मिन्निति०' (१।१।६६) सूत्र से 'निर्दिष्टे' पद की अनुवृत्ति आने पर अव्यवहित पद की उपस्थिति होती है। अतः विधिसूत्रों में पञ्चमी विभक्ति से निर्दिष्ट जो पद हो, उससे परवर्ण को कार्य होता है।

---

१. 'रेफोष्मणां सवर्णा न सन्ति'—महाभाष्यम्।

परस्य १।१।५४। परस्य यद्विहितं तत्तस्याऽऽदेर्बोध्यम्। अत्राघोषस्य महाप्राणस्य विवारस्य श्वासस्य सस्य तादृश एव थः, इति सस्य थः। (८१) झरो झरि सवर्णे ८।४।६५। हलः परस्य झरो लोपो वा स्यात्सवर्णे झरि। (८२) खरि च ८।४।५५। खरि परे झलां चरः स्युः। इत्युदो दस्य तः। उत्थानम्, उत्तम्भनम्। (८३) झयो

---

(८२) **उत्थानमिति**। 'उद्+स्थानम्' इति स्थिते 'तस्मादित्युत्तरस्य' 'आदेः परस्ये'ति परिभाषयोः सहकारेण 'उदःस्थास्तम्भोः पूर्वस्ये'ति सूत्रेण विवारश्वासाघोषमहाप्राणवतः सकारस्य स्थाने विवारश्वासाघोषमहाप्राणवति थकारे कृते उद् थ् थानम् मिति जाते 'झटो झरि सवर्णे' इत्यनेन पूर्वथकारस्य विकल्पेन लोपे

---

(८०) **पद**—आदेः, परस्य। **अनुवृत्ति**—अलः। **परिभाषासूत्र**।

मूलार्थ—पर को विधान किया गया कार्य पर के आदि वर्ण को होता है।

विमर्श—उक्त दोनों परिभाषासूत्रों का आशय यह है कि पञ्चमी विभक्ति से निर्दिष्ट पर के स्थान में होने वाला कार्य (आदेश) पर के आदि वर्ण के स्थान में होता है। **उदाहरण**—उद्+स्थानम्' में 'उद्' से परे 'स्थानम्' को पूर्व सवर्ण विधान किया गया है। वह इस परिभाषा के बल से 'स्थानम्' के आदि वर्ण 'स्' के स्थान में होता है। तदनुसार यहाँ 'स्' से पूर्व वर्ण 'द्' है। अतः उसका सवर्ण 'थ्' विधान किया जायेगा, क्योंकि 'स्' और 'थ्' का विवार, श्वास, अघोष और महाप्राणप्रयत्न समान है।

(८१) **पद**—झरः, झरि, सवर्णे। **अनुवृत्ति**—अन्यतरस्याम्, हलः, लोपः। **विधिसूत्र**।

मूलार्थ—'हल्' से परे 'झर्' का विकल्प से लोप होता है, यदि उसके अनन्तर सवर्ण 'झर्' परे हो तो।

विमर्श—प्रकृत सूत्र में 'झयो होऽन्यतरस्याम्' (८।४।६८) से 'अन्यतरस्याम्' तथा 'हलो यमाम्०' (८।४।६४) से 'हलः' और 'लोपः' पदों की अनुवृत्ति आती है। तदनुसार हल् वर्णों के पश्चाद्वर्ती झर् वर्णों का विकल्प से लोप होता है यदि इसके पश्चात् भी अन्य सवर्ण 'झर्' वर्ण रहे।

पूर्वोक्त उदाहरण में पूर्वसवर्ण होने पर 'उद् थ् थानम्' स्थिति हुई। प्रकृत सूत्र द्वारा 'थ्' का विकल्प से लोप होने से 'उद् थानम्'।

(८२) **पद**—खरि, च। **अनुवृत्ति**—झलां, चर्। **विधिसूत्र**।

मूलार्थ—'खर्' परे रहते 'झल्' के स्थान में 'चर्' आदेश हो।

विमर्श—यहाँ 'झलां जश् झशि' (८।४।५३) सूत्र से झल् (स्थानी) की तथा 'अभ्यासे चर्च' (८।४।५४) सूत्र से 'चर्' की अनुवृत्ति आती है। इस प्रकार 'खर्' परे रहने पर झल वर्ण के स्थान में 'चर्' आदेश होते हैं। आदेशों में स्थान कृत सादृश्य लिया जाता है। यथा—

स्थानी 'झल्' वर्ण	सादृश्य (स्थान)	आदेश (चर्)
क्, ख्, ग्, घ्	कण्ठ	क्
च्, छ्, ज्, झ्	तालु	च्
ट्, ठ्, ड्, ढ्	मूर्धा	ट्
त्, थ्, द्, ध्	दन्त	त्
प्, फ्, ब्, भ्	ओष्ठ	प्

अतः 'खरि च' सूत्र से 'उद् थानम्' में 'द्' को चर्त्व होकर 'त्' होता है। **उदाहरण**—

होऽन्यतरस्याम् ८।४।६२ । झयः परस्य हस्य वा पूर्वसवर्णः स्यात् । नादस्य घोषस्य संवारस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थ एवादेशः । वाग्घरिः । वाग्हरिः । (८४) **शश्छोऽटि ८।४।६३ ।** पदान्ताज्झयः परस्य शस्य छो वा स्यादटि । तच्छिवः । तच् शिवः । पदान्तात्किम् । विरप्शम् । छत्वममीति वाच्यम् । तच्छ्लोकेन । तच्

'खरि चे'ति सूत्रेण चर्त्वे दकारस्य तकारे उत्थानमिति पक्षे उत्थ्थानमिति । एवं उद् + स्तम्भनम् ।

(८३) **झय इति ।** 'उदः स्थास्तम्भोः०' इत्यतः पूर्वस्येति 'अनुस्वारस्य ययि' इत्यतः सवर्ण इति चानुवर्तते । 'वाक् + हरिः' इति स्थिते 'झलां जशोऽन्ते' इत्यनेन जश्त्वे गकारे कृते 'झयो होऽन्यतरस्याम्' इति सूत्रेण पूर्वसवर्णे हकारस्य स्थाने विकल्पेन घकारे कृते 'वाग्घरिः' इति । पक्षे 'वाग्हरिः' इति । (अत्र संवारनादघोषमहाप्राणवता हकारेण संवारनादघोषमहाप्राणवान् घकारे तुल्य इत्यवधेयम्) ।

(८४) **तच्छिव इति ।** 'तद् + शिवः' इत्यवस्थायाम् 'स्तोः श्चुना श्चुः' इत्यनेन श्चुत्वे दकारस्य जकारे कृते 'खरि चे'ति जकारस्य चकारे कृते 'तच् शिवः' इति जाते 'शश्छोऽटि' इति सूत्रेण झय्प्रत्याहारबोध्यवर्णचकारात्परस्य शस्य अट्-

---

(१)—उत्थानम् । पक्ष में ('थ्' का लोप न होने पर) उत्थ्थानम् । अर्थ—उठना । (२) उद् + स्तम्भनम् (स्=थ्), उद् थ् तम्भनम् (थ् का विकल्प से लोप)—उद् तम्भनम् ('द्'= 'त्'—'खरि च')=उत्तम्भनम् । पक्ष में (थ् का लोप न होने पर)—उत्थ्तम्भनम् ।

(८३) पद—झयः, हः, अन्यतरस्याम् । **अनुवृत्ति**—पूर्वस्य, सवर्णः । **विधिसूत्र ।**

मूलार्थ—'झय्' से परे हकार को विकल्प से पूर्वसवर्ण होता है । संवार, नाद, घोष और महाप्राण प्रयत्न वाले 'ह्' वर्ण के स्थान पर उसी के समान 'घ्' होता है । वाग्घरिः । वाग्हरिः ।

विमर्श—सूत्र में स्थानी 'ह्' का निर्देश किया गया है । परन्तु आदेश का उल्लेख नहीं किया गया । अतः 'उदः स्था०' (८।४।६१) सूत्र से 'पूर्वस्य' तथा 'अनुस्वारस्य ययि०' (८।४।५८) से 'सवर्णः' पद की अनुवृत्ति आती है । तदनुसार पूर्वसवर्ण आदेश होता है । स्थानी से पूर्व भी झय् प्रत्याहारबोध्य वर्ण होना आवश्यक है । पूर्वसवर्ण में 'स्थानेऽन्तरतमः' परिभाषा द्वारा गुण कृत साम्य ग्रहण किया जाता है । प्रस्तुत उदाहरण में स्थानकृत साम्य होने से 'ह्' के स्थान पर क्, ख्, ग्, घ्—वर्णों की प्राप्ति होती है, परन्तु संवार, नाद, घोष तथा महाप्राण प्रयत्न वाला केवल 'घ्' ही है । अतः 'ह्' के स्थान पर पूर्व सवर्ण 'घ्' ही होगा । **उदाहरण**—'वाग् + हरिः' (ह्=घ—विकल्प से पूर्वसवर्ण)=वाग्घरिः । पक्ष में वाग्हरिः । अर्थ—वाणी में चतुर ।

(८४) पद—शः, छः, अटि । **अनुवृत्ति**—पदान्तस्य, झयः, अन्यतरस्याम् । **विधिसूत्र ।**

मूलार्थ—पदान्त झय् के अनन्तर 'श्' के स्थान पर विकल्प से 'छ्' आदेश होता है । यदि उस 'श्' के बाद 'अट्' हो तो ।

विमर्श—प्रकृत सूत्र में 'झयो०' (८।४।६२) सूत्र से 'झयः' तथा 'अन्यतरस्याम्' एवं 'वापदान्तस्य' सूत्र से 'पदान्तस्य' पदों की अनुवृत्ति आती है । 'पदान्तस्य' की षष्ठी विभक्ति पञ्चमी में परिवर्तित होकर 'झयः' की विशेषण बन जाती है । तदनुसार पदान्त में विद्यमान झय् प्रत्याहारबोध्य वर्ण के बाद श् के स्थान में छ् आदेश विकल्प से होता है, यदि उसके आगे अट् वर्ण रहें तो । **उदाहरण**—तद् + शिवः ('द्'='ज्'—श्चुत्व)—'तज् + शिवः'—('ज्'='च्'

श्लोकेन । अमि किम् ? वाक् श्च्योतति । (८५) **मोऽनुस्वारः ८।३।२३ ।** मान्तस्य पदस्यानुस्वारः स्याद्धलि । हरिं वन्दे । पदस्य किम् ? गम्यते । (८६) **नश्चापदान्तस्य झलि ८।३।२४ ।** नस्य मस्य चापदान्तस्य झल्यनुस्वारः स्यात् । यशांसि ।

प्रत्याहारबोध्यघटके इकारे परे छत्वे 'तच्छिवः' इति । छत्वाभावे तु 'तच्शिवः' इति । पदान्तत्वाभावे तु 'विरप्शमि'त्यत्र शकारे छत्वापत्तिः स्यात् । **छत्वममीति ।** 'शश्छोऽटि' इति सूत्रे 'अटी'ति पदं विहाय अमीति वाच्यमित्यर्थः ।

(८५) **मोऽनुस्वार इति ।** पदस्येत्यधिकृतम्, म इति पदस्य विशेषणम्, तदन्तविधिः । 'हलि सर्वेषामि'त्यतो हलीत्यनुवर्तते । 'हरिम् + वन्दे' इत्यत्र अलोऽन्त्यपरिभाषया मकारस्यानुस्वारे 'हरिं वन्दे' इति ।

—'खरि च' से चर्त्व)—तच् शिवः ('श्'='छ्'—विकल्प से)=तच्छिवः । पक्ष में तच्शिवः । अर्थ—उसका शिव ।

सूत्र में पदान्त ग्रहण न करने पर एकपद—'विरप्शम्' में 'श्' के स्थान पर 'छ्' हो जाता, अतः 'पदान्त' पद का ग्रहण किया गया है । (वा०) पदान्त झय् से परे 'श्' के स्थान पर छत्व-विधायक उक्त सूत्र 'अटि' के स्थान पर 'अमि' कहा जाय । **उदाहरण**—'तद्+श्लोकेन' (द्=ज्—श्चुत्व) ज्=च्—चर्त्व—तच्+श्लोकेन (श्=छ्—'अम्' परे रहने से) तच्छ्लोकेन । छत्व के अभाव पक्ष में तच् श्लोकेन । **प्रत्युदाहरण**—प्रकृत वार्तिक में 'अम्' पद के अभाव में 'वाक्+श्च्योतति' में 'क्' के अनन्तर 'श्' के स्थान पर 'छ्' आदेश की प्राप्ति होती है । वह न हो इसलिए वार्तिक में 'अमि' पद ग्रहण किया गया है । क्योंकि 'श्' के बाद 'च्' वर्ण अम् प्रत्याहार के अन्तर्गत नहीं आता ।

(८५) पद—मः, अनुस्वारः । **अनुवृत्ति**—हलि । **विधिसूत्र ।**

मूलार्थ—मान्त पद को हल् परे रहते अनुस्वार होता है ।

विमर्श—प्रकृत सूत्र में 'हलि सर्वेषाम्' सूत्र से 'हलि' पद की अनुवृत्ति आ रही है । 'पदस्य' का अधिकार होने से तदन्तविधि होती है । 'अलोऽन्त्यस्य' परिभाषा के द्वारा पद के अन्तिम वर्ण 'म्' के स्थान पर अनुस्वार होता है; उस मकार के बाद यदि कोई 'हल्' वर्ण हो तो । **उदाहरण**—'हरिम्+वन्दे' (म्=ं)=हरिं वन्दे । अर्थ—हरि को प्रणाम । **प्रत्युदाहरण**—इस सूत्र में 'पद' ग्रहण न करने पर (गम्यते) 'गम्+य+ते' 'म्' के स्थान पर 'हल्' वर्ण परे रहते अनुस्वार हो जाता; वह न हो, इसलिए 'पद' ग्रहण किया गया है । यहाँ 'म्' पद के अन्त में न होने से अनुस्वार नहीं होगा ।

(८६) पद—नः, च, अपदान्तस्य, झलि । **अनुवृत्ति**—मः, अनुस्वारः । **विधिसूत्र ।**

मूलार्थ—'झल्' परे रहते अपदान्त नकार और मकार के स्थान पर अनुस्वार होता है ।

विमर्श—प्रकृत सूत्र में 'मोऽनुस्वारः' (८।२।२३) से 'मः' तथा 'अनुस्वारः' की अनुवृत्ति आती है । यह सूत्र पदान्त से भिन्न स्थान में अनुस्वार का विधान करता है । तदनुसार अपदान्त 'न्' और 'म्' के स्थान में आगे झल् वर्ण परे होने पर अनुस्वार होता है । **उदाहरण**—(१) 'यशान्+सि' (अपदान्त 'न्' का अनुस्वार होने से)—यशांसि । (२) 'आ+क्रम्+स्यते' (झल् 'स' परे रहने पर अपदान्त 'म्' को अनुस्वार)—आक्रंस्यते । **प्रत्युदाहरण**—सूत्र में 'झल्' पद का

आक्रंस्यते । झलि किम् ? मन्यते । (८७) अनुस्वारस्य ययि परसवर्णः ८।४।५८ । अङ्कितः । अञ्चितः । शान्तः । गुम्फितः । (८८) वा पदान्तस्य ८।४।५९ । पदान्तस्यानुस्वारस्य ययि(परे)परसवर्णो वा स्यात् । त्वङ्करोषि । त्वं करोषि । (८९) मो राजि समः क्वौ ८।३।२५ । क्विबन्ते राजतौ परे समो मस्य म एव स्यात् ।

---

(८७) अपदान्तस्यानुस्वारस्य ययि परे नित्यं परसवर्णः स्यादित्यर्थः । **अङ्कित इति ।** 'अङ्क पदे लक्षणे चे'ति स्वार्थिकण्यन्तात् क्तः, इट् 'निष्ठायां सेटि' इति णिलोपः 'नश्चापदान्तस्य झलि' इति सूत्रेणानुस्वारे तस्य 'अनुस्वारस्य ययि परसवर्णः' इत्यनेन नासिकास्थानसाम्यात् परसवर्णे ङकारे 'अङ्कितः' इति । एवम्—अञ्चितः, शान्तः, गुम्फित इत्यादि ।

(८८) पदान्तस्यानुस्वारस्य ययि परे वा परसवर्णः स्यादिति सूत्रार्थः । **त्वङ्करोषि इति ।** 'त्वम् + करोषि' इत्यत्र 'मोऽनुस्वारः' इत्यनुस्वारे 'वा पदान्तस्ये'त्यनेन विभाषया परसवर्णे कृते त्वङ्करोषि इति । पक्षे त्वं करोषि इति ।

(८९) **मो राजीति ।** अत्र 'मोऽनुस्वारः' इत्यतो म इति स्थानषष्ठ्यन्तमनु-

---

ग्रहण न होने पर 'मन्यते' में अपदान्त 'न्' को 'य्' परे रहते (झल् न होने पर भी) अनुस्वार होने लगेगा । वह न हो, इसलिए 'झल्' पद का ग्रहण किया गया है । अर्थ—मानता है ।

(८७) पद—अनुस्वारस्य, ययि, परसवर्णः । **अनुवृत्ति**—अपदान्तस्य । **विधिसूत्र ।**

मूलार्थ—अपदान्त अनुस्वार के स्थान में यय् परे रहते परसवर्ण होता है ।

विमर्श—'परसवर्ण' का अर्थ है कि अनुस्वार का अपने परवर्ती वर्णों के पञ्चम वर्ण में परिवर्तित हो जाना । प्रकृत्र सूत्र द्वारा अपदान्त न्, म् के स्थान पर हुए अनुस्वार के स्थान पर परसवर्ण होता है । **उदाहरण**—(१) अन्क+क्त (त)—('त' से पूर्व इट् का आगम)—अ न् क्+इ+त (न्=ं अनुस्वार)—अंक्+इत परसवर्ण 'ङ्'=अङ्कित+सु विभक्ति (स्=र्= :)=अङ्कितः । अर्थ—चिह्नित । (२) अन्च्+क्त (त)—अ न् च्+इत—अन्+चितः (न्=ं अनुस्वार) अंचितः (ं=परसवर्ण 'ञ्')-अञ्चितः । अर्थ—पूजित । (३) शम्+क्तः (त) (दीर्घ) शाम्+त (अनुस्वार)=शांतः अनुस्वार से 'त्' परे रहते परसवर्ण 'न्')= शान्तः । (४) गुम्फ्+क्तः (त) गुम्फ्+इत (अनुस्वार)—गुंफ्+इत=गुंफितः (अनुस्वार से 'फ्' परे रहते 'म्' परसवर्ण)=गुम्फितः । अर्थ—गूँथा हुआ ।

(८८) पद—वा पदान्तस्य । **अनुवृत्ति**—अनुस्वारस्य ययि परसवर्णः । **विधिसूत्र ।**

मूलार्थ—पदान्त अनुस्वार के स्थान में यय् परे रहते विकल्प से परसवर्ण होता है ।

विमर्श—प्रकृत सूत्र में सम्पूर्ण पूर्वसूत्र (८७) की अनुवृत्ति आती है । तदनुसार 'यय्' परे रहते पदान्त अनुस्वार के स्थान पर विकल्प से परसवर्ण होता है । **उदाहरण**—'त्वम्+करोषि' (म्=ं अनुस्वार)—(ं='ङ्' परसवर्ण)=त्वङ्करोषि । पक्ष में त्वं करोषि । अर्थ—तू करता है ।

(८९) पद—मः, राजि, समः क्वौ । **अनुवृत्ति**—मः । **विधिसूत्र ।**

मूलार्थ—क्विप् प्रत्ययान्त राज् धातु परे रहते सम् के 'म्' को 'म' ही रहता है ।

विमर्श—प्रकृत सूत्र में 'मोऽनुस्वारः' से 'मः' पद की अनुवृत्ति आती है । प्रत्ययग्रहण

सम्राट्। (९०) हे मपरे वा ८।३।२६। मपरे हकारे मस्य मो वा स्यात्। किम् ह्मलयति। किं ह्मलयति। * यवलपरे यवला वेति वक्तव्यम् *। कियँ ह्यः। किं ह्यः। किवँ ह्वलयति। किं ह्वलयति। किलँ ह्लादयति। किं ह्लादयति। (९१) नपरे नः ८।३।२७। नपरे हकारे मस्य नो वा। किन् ह्नुते। किं ह्नुते। (९२) ङः सि

वर्तते। समः इत्यवयवषष्ठी। प्रत्ययग्रहणपरिभाषया क्विप्प्रत्ययान्तलाभः। तदाह—**क्विबन्त इति।**

(९०) किम् + ह्मलयति पक्षेऽनुस्वारः। **कियँ ह्य इति।** 'किम् + ह्यः' इति स्थिते 'यवलपरे यवला वा' इति वार्तिकेन यपरके हकारे परे 'मोऽनुस्वारः' इति प्राप्तमनुस्वारं प्रबाध्य मकारस्यानुनासिके यकारे विकल्पेन कृते 'कियँ ह्यः' इति। पक्षेऽनुस्वारे किं ह्य इति।

(९१) किम् + ह्नुते।

परिभाषा से तदन्तविधि होने से क्विप्प्रत्ययान्त राज् धातु परे रहते 'सम्' उपसर्ग के अवयव मकार के स्थान पर **'म्'** ही होता है। **उदाहरण**—सम् + राज् + क्विप् (लोप, सुलोप)—सम्राज् ('व्रश्च०' से ज्'='ष्')—सम्राष् (ष्=ड्—जश्त्व)—सम् + राड्) (ड्=ट्—चर्त्व)—सम् + राट् ('म्'='म्')=सम्राट् (अनुस्वार का अभाव)। अर्थ—चक्रवर्ती राजा।

(९०) पद—हे, मपरे, वा। **अनुवृत्ति**—मः (षष्ठी), मः प्रथमा। **विधिसूत्र।**

मूलार्थ—मपरक हकार परे रहते 'म्' को 'म्' विकल्प से होता है।

मूलार्थ—'यण्' के स्थान में होने वाले 'इक्' की सम्प्रसारण संज्ञा होती है ।

विमर्श—यण्=य्, व्, र्, ल् तथा इक्=इ, उ, ऋ, लृ की संख्या समान होने से य् के स्थान में स्थानकृत सादृश्य से क्रमानुसार इ, व्=उ, ऋ=र् तथा लृ=ल् सम्प्रसारणसंज्ञक होंगे ।

(२७८) पद—वाहः, ऊठ् । **अनुवृत्ति**—भस्य, सम्प्रसारणम् । **विधिसूत्र ।**

मूलार्थ—भसंज्ञक 'वाह्' को सम्प्रसारणसंज्ञक 'ऊठ्' आदेश होता है ।

विमर्श—'भस्य' (६।४।१२९) का अधिकार है । 'वसोः सम्प्रसारणम्' (६।४।१३१) सूत्र से 'सम्प्रसारणम्' की अनुवृत्ति आ रही है । तदनुसार "भसंज्ञक 'वाह्' शब्द के 'व्' के स्थान पर 'ऊठ्' (ऊ) सम्प्रसारण होता है ।"

(२७९) पद—सम्प्रसारणात् च । **अनुवृत्ति**—पूर्वः, अचि, एकः पूर्वपरयोः । **विधिसूत्र ।**

सम्प्रसारणादचि परे पूर्वरूपमेकादेशः । वृद्धिः । विश्वौहः । इत्यादि । (२८०) चतुरनडुहोरामुदात्तः ७।१।९८ । सर्वनामस्थाने । (२८१) सावनडुहः ७।१।८२ । अस्य

इत्यतः पूर्वं इति चानुवर्तते । 'एकः पूर्वपरयोरि'त्यधिक्रियते । तदाह—**सम्प्रसारणादचीत्यादि ।** **विश्वौह इति ।** विश्ववाह्शब्दाच्छसि शस्येत्संज्ञायां लोपे च **'इग्यणः सम्प्रसारणमि'**ति यणः स्थाने इग्रूपस्य सम्प्रसारणसंज्ञायां 'वाह ऊठ्' इत्यनेन **वकारस्य सम्प्रसारणे** ऊकारे 'सम्प्रसारणाच्च' इति पूर्वरूपैकादेशे 'विश्व+ऊह्+अस्' **इति जाते** 'एत्येधत्यूठ्सु' इत्यनेन पूर्वपरयोः स्थाने **वृद्धौ संयोगे च कृते सस्य रुत्वे विसर्गे 'विश्वौहः'** इति ।

(२८०) चतुरनडुहोरामिति । अत्र 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने' **इत्यनुवर्तते ।** चतुरनडुहोराम् स्यात् सर्वनामस्थाने परे स चोदात्त इत्यर्थः ।

मूलार्थ—सम्प्रसारण से अच् परे रहने पर पूर्व-पर के स्थान में पूर्वरूप एकादेश होता है। विश्वौहः। इत्यादि ।

विमर्श—सूत्रार्थ हेतु यहाँ 'अमि पूर्वः' (१५२) से 'पूर्वः' तथा 'इको यणचि' (१५) से **अचि** की अनुवृत्ति आती है । 'एकः पूर्वपरयोः' (६।१।८३) का अधिकार है । तदनुसार सम्प्रसारण (इ, उ, ऋ, ऌ) के पश्चात् अच् वर्ण के परे रहते पूर्व-पर वर्णों के स्थान में पूर्वरूप एकादेश होता है ।

उदाहरण—विश्ववाह् (=परमात्मा) + शस् (अस्), ('इग्यणः सम्प्रसारणम्' से सम्प्रसारण संज्ञा होने पर 'वाह ऊठ्' से व=ऊठ् (ऊ)—सम्प्रसारण) विश्व+ऊ+आह्+अस्, (ऊ+आ=ऊ—पूर्वरूप 'सम्प्रसारणाच्च')—विश्व+ऊह्+अस् (अ+ऊ='औ' वृद्धि—'एत्येधत्यूठ्सु')—विश्वौह स् (स्=रुत्व-विसर्ग)=विश्वौहः ।

हकारान्त पुंल्लिङ्ग 'विश्ववाह्' (ईश्वर) शब्द के रूप

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०	विश्ववाट्-ड्	विश्ववाहौ	विश्ववाहः	पं०	विश्वौहः	विश्ववाड्भ्याम्	विश्ववाड्भ्यः
द्वि०	विश्ववाहम्	विश्ववाहौ	विश्वौहः	ष०	विश्वौहः	विश्वौहोः	विश्वौहाम्
तृ०	विश्वौहा	विश्ववाड्भ्याम्	विश्ववाड्भिः	स०	विश्वौहि	विश्वौहोः	विश्ववाट्त्सु, विश्ववाट्सु
च०	विश्वौहे	विश्ववाड्भ्याम्	विश्ववाड्भ्यः	सं०	हे विश्ववाट्-ड्	हे विश्ववाहौ	हे विश्ववाहः

इसी प्रकार पृष्ठवाह्, भारवाह् इत्यादि शब्दों के रूप बनेंगे ।

(२८०) पद—चतुरनडुहोः, आम्, उदात्तः । **अनुवृत्ति**—सर्वनामस्थाने । **विधिसूत्र ।**

मूलार्थ—सर्वनामस्थान परे रहते 'चतुर्' और 'अनडुह्' शब्द को 'आम्' का आगम होता है और वह उदात्त भी होता है ।

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (७।१।८६) से 'सर्वनामस्थाने' पद की अनुवृत्ति आती है । तदनुसार चतुर् (=चार) और अनडुह् (=बैल) शब्द को आम् आगम होता है, सर्वनामस्थानसंज्ञक (सु, औ, जस्, अम्, औट्) प्रत्यय के परवर्ती रहने पर । 'आम्' में 'म्' की इत्संज्ञा होने के कारण 'मिदचोऽन्त्यात्परः' परिभाषा की उपस्थिति से अन्त्य अच् से परे 'आ' होगा ।

नुम् स्यात्सौ परे । 'आच्छीनद्योरि'ति सूत्रादादित्यधिकारादवर्णात् परोऽयं नुम् । अतो विशेषविहितेनापि नुमा आम् न बाध्यते । आमा नुम् न बाध्यते । सुलोपः । संयोगान्तस्य लोपः । नुम्विधिसामर्थ्याद्वसुस्रंस्विति दत्वं न । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । अनड्वान् । (२८२) अम् सम्बुद्धौ ७।१।९९ । चतुरनडुहोः अम् स्यात् सम्बुद्धौ

---

(१८१) **सावनडुह इति** । 'आच्छीनद्योर्नुम्' इत्यतो 'नुमि'त्यनुवर्तते । तदाह—**अस्येति** । अनडुह्शब्दस्येत्यर्थः । **अनड्वानिति** । 'अनुडुह् + स्' (सु) इति स्थिते 'चतुरनडुहोरामुदात्तः' इत्यनेनामागमेऽनुबन्धलोपे 'अनडु + आ + ह + स्' इति जाते 'सावनडुहः' इति नुमि उमिगते अनडु 'आ न् ह स्' इति जाते, 'हल्ङ्याब्भ्यो०' इति सस्य लोपे 'संयोगान्तस्य लोपः' इत्यनेन हकारस्य लोपे, यणि कृते अनड्वान् इत्यत्र 'नलोपः' इति नलोपे प्राप्ते 'पूर्वत्रासिद्धमि'ति संयोगान्तलोपस्यासिद्धत्वात् लोपाभावे 'अनड्वान्' इति सिद्धम् ।

(२८२) **अमिति** । 'चतुरनडुहोः' इत्यनुवर्तते । तदाह—**चतुरनडुहोरिति** । **हे अनड्वन्निति** । 'अम्सम्बुद्धावि'ति अम्, यण्, नुम्, सुलोपः संयोगान्तलोपश्च ।

---

(२८१) पद—सौ, अनडुहः । **अनुवृत्ति**—नुम् , आत् । **विधिसूत्र** ।

मूलार्थ—'सु' के परवर्ती रहने पर 'अनडुह्' शब्द को नुम् का आगम होता है । 'आच्छीनद्योः' से अनुवृत्त 'आत्' अधिकार होने के कारण यह नुम् अवर्ण से परे होता है । विशेष विधान होने के कारण 'नुम्' आम् का बाधक नहीं होता । अम् भी नुम् का बाधक नहीं होता है । सु का लोप । संयोगान्त लोप । नुम्-विधान के सामर्थ्य से 'वसुस्रंसु०' सूत्र से द् भी नहीं होता । संयोगान्त लोप असिद्ध होने के कारण 'नलोपः' से न लोप भी नहीं होता । अनड्वान् ।

विमर्श—प्रकृत सूत्र में 'आच्छीनद्योर्नुम्' (७।१।८०) से 'नुम्' की अनुवृत्ति आ रही है । तदनुसार सु विभक्ति के परे रहते 'अनडुह्' शब्द को नुम् का आगम होता है । यह 'नुम्' मित् होने से अन्त्य अच् से परे होना चाहिए था । परन्तु यहाँ 'आच्छीनद्योर्नुम्' से अधिकार के रूप में 'आत्' पद की अनुवृत्ति आने से अनडुह् शब्द के अन्तिम अवर्ण से पर में नुम् (न्) होगा । अतः नुम् होने से पूर्व आ (आम्) किया जाता है । नुम् के प्रवृत्त होने में आम् उपजीव्य है । इस प्रकार नुम् शास्त्र में विशेषता होने पर भी वह आम्-विधायक शास्त्र का बाधक नहीं होता । सम्बोधन के एकवचन सु में होने वाला अम् भी नुम् का बाधक नहीं होता है ।

उदाहरण—(१) अनडुह् + सु (स्) (अन्तिम अच् 'उ' के पश्चात् आम् (आ) का आगम—'चतुरनडुहोराम्०') अनडु + आह् + स् , (उ = व्—'यण्') अनड्वा + ह् + स् , (आ से पर 'नुम्'—'सावनडुहः') अनड्वा न् ह् स् , (स्—विभक्तिलोप)—अनड्वान् ह् (ह् का संयोगान्त लोप) = अनड्वान् । (यहाँ 'पूर्वत्रासिद्धम्' से 'संयोगान्तस्य लोपः' के असिद्ध हो जाने से 'नलोपः०' से 'न्' का लोप नहीं होता ।

(२८२) पद—अम् , सम्बुद्धौ । **अनुवृत्ति**—चतुरनडुहोः । **विधिसूत्र** ।

मूलार्थ—सम्बुद्धिसंज्ञक प्रत्यय के परे रहते चतुर् और अनडुह् शब्द को अम् का आगम होता है ।

विमर्श—यहाँ 'चतुरनडुहोरामुदात्तः' (७।१।९८) से 'चतुरनडुहोः' की अनुवृत्ति आ रही

परतः । हे अनड्वन् । अनड्वाहौ । अनड्वाहः । अनडुहः । (२८३) **वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२** । सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते । अनडुद्भ्यामित्यादि । सान्तेति किम् ? विद्वान् । पदान्ते किम् ? स्रस्तम् । ध्वस्तम् । (२८४)

---

(२८३) वसुस्रंस्विति । अत्र वसोः प्रत्ययत्वेन 'प्रत्ययग्रहणे' इति परिभाषया तदन्तं गृह्यते । 'ससजुषो रुः' इत्यतः स इति लुप्तषष्ठ्यन्तं पदमनुवृत्तम्, तेन वसुर्विशेष्यते । तदन्तविधिः । सान्तत्वं स्रंसादेर्न विशेषणम् । अव्यभिचारात् सर्वत्र सान्तत्वस्यैव सत्वात् । पदस्येत्यधिकृतम् । फलितार्थमाह—**सान्तेत्यादि** ।

है। तदनुसार सम्बुद्धि (सम्बोधन का एकवचन) परवर्ती रहने पर चतुर् और अनडुह् शब्द को अम् (अ) का आगम होता है । यह सूत्र 'आम्' का अपवाद है ।

उदाहरण—(२) हे अनडुह्+सु (स्), ('उ' के बाद 'अम्' का आगम) अनडु+अह्+स्, (उ=व्—यण्) अनड्व ह् स्, (नुम् का आगम—'सावनडुहः') अनड्वन् ह् स्, (स् का लोप) अनड्वन् ह् (ह् का लोप—'संयोगान्तस्य लोपः') हे अनड्वन् ! (३) अनडुह्+औ ('आम्' का आगम) अनडु आह्+औ, (उ=व्—'यण्') अनड्वाहौ । (४) अनडुह्+जस् (अस्) (आम्—आगम) अनडु—आह्+अस्, (उ=व्) यण्—अनड्वाह स् (स्=रुत्व-विसर्ग)=अनड्वाहः । (५) अनडुह्+शस् (अस्), (सर्वनामस्थानसंज्ञक विभक्ति न होने से आम् नहीं) अनडुहस् (स्=रुत्व-विसर्ग)=अनडुहः ।

(२८३) पद—वसुस्रंसुध्वंस्वनडुहां, दः । **अनुवृत्ति**—पदस्य, सः, अन्ते । **विधिसूत्र** ।

मूलार्थ—पदान्त में सान्त वसु प्रत्ययान्त और स्रंसु आदि को द् आदेश होता है । अनडुद्भ्यामित्यादि ।

विमर्श—यहाँ 'ससजुषो रुः' से 'सः' (षष्ठ्यन्त) की अनुवृत्ति आती है। 'पदस्य' का अधिकार है । उसे बहुवचन में परिवर्तित कर दिया जाता है । 'सः' पद 'वसु' का विशेषण होने से तदन्त विधि होती है । 'स्कोः संयोगाद्योरन्ते च' से अनुवृत्त 'अन्ते' पद के साथ 'पदानाम्' का योग होता है । तदनुसार—'पदान्त में सकारान्त वसु प्रत्ययान्त शब्द, स्रंस्, ध्वंस् तथा अनडुह् के अन्तिम वर्ण के स्थान पर 'द्' आदेश होता है ।'

उदाहरण—(६) अनडुह्+भ्याम् (हलादि विभक्ति (भ्याम्) के परे होने पर 'स्वादिष्वसर्वनामस्थाने' से 'अनडुह्' की पद संज्ञा होने पर ह्=द्—'वसु०')=अनडुद्भ्याम् ।

प्रत्युदाहरण—(१) सूत्र में सान्त पद वसु-प्रत्ययान्त का विशेषण है । अत एव वसु-प्रत्ययान्त 'विद्वान्' रूप सिद्ध पर यह सकारान्त न होने के कारण 'न्' के स्थान पर द् नहीं हुआ । (२) पदान्त में 'स्' होने की अपेक्षा होने से स्रस्तम्, ध्वस्तम् में 'क्त' प्रत्यय के बाद 'स्' पदान्त में न होने 'द्' नहीं हुआ ।

अनडुह् (=बैल) शब्द के रूप

	एक०	द्वि०	बहु०
प्र०	अनड्वान्	अनड्वाहौ	अनड्वाहः
द्वि०	अनड्वाहम्	अनड्वाहौ	अनडुहः
तृ०	अनडुहा	अनडुद्भ्याम्	अनडुद्भिः
च०	अनडुहे	अनडुद्भ्याम्	अनडुद्भ्यः
पं०	अनडुहः	अनडुद्भ्याम्	अनडुद्भ्यः
ष०	अनडुहः	अनडुहोः	अनडुहाम्
स०	अनडुहि	अनडुहोः	अनडुत्सु
सं०	हे अनड्वन्	हे अनड्वाहौ	हे अनड्वाहः

सहेः साडः सः ८।३।५६। साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्। तुराषाट्-तुराषाड्। तुरासाहौ। तुराषाड्भ्यामित्यादि। (२८५) दिव औत् ७।१।८४। दिविति प्रातिपदिकस्यौत्स्यात्सौ। सुद्यौः। सुदिवौ। (२८६) दिव उत् ६।१।१३१। दिवोऽन्तादेश उकारः स्यात् पदान्ते। सुद्युभ्यामित्यादि। चत्वारः। चतुरः। चतुर्भिः।

---

(२८४) **सहेः साड इति।** 'अपदान्तस्य मूर्द्धन्यः' इत्यधिकृतम्। 'षह मर्षणे' इत्यस्माद्धातोरिक्प्रत्यये 'धात्वादेः०' इति षस्य सत्वे सहिपदम्। षह्धातोरित्यर्थः। सूत्रे साडिति कृतढत्वडत्ववृद्धेरनुकरणम्। तदाह मूले—**साड्रूपस्येति।** साड्रूपता-मापन्नस्य सह्धातोरित्यर्थः। **तुराषाट् इति।** 'तुरासाह्+स्' इत्यत्र सलोपे 'हो ढः' इति हस्य ढत्वे तस्य जश्त्वेन डत्वे 'सहेः साडः सः' इति साड्रूपस्य सकारस्य षत्वे 'वाऽवसाने' इत्यनेन विकल्पेन चर्त्वे 'तुराषाट्' इति। चर्त्वाभावे तुराषाडिति।

(२८५) **दिव औदिति।** दिव इत्यनेनाव्युत्पन्नस्य 'दिवेर्डिविः' इत्युणादि-निष्पन्नस्य ग्रहणम्। 'सावनडुहः' इत्यतः सावित्यनुवर्तते। तदाह—**दिविति।**

(२८६) **दिव उदिति।** अत्र 'एङः पदान्तादति' इत्यतः पदान्तादित्यनुवर्तते, तच्च सप्तम्या विपरिणम्यते। तदाह—**दिवोऽन्तादेश इत्यादिना।**

---

(२८४) पद—सहेः, साडः, सः। **अनुवृत्ति**—मूर्द्धन्यः। **विधिसूत्र।**

मूलार्थ—सह् के साड्रूप में परिवर्तित हो जाने पर सकार के स्थान में मूर्धन्य (षकार) हो जाता है।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'अपदान्तस्य मूर्द्धन्यः' (८।३।५५) से 'मूर्द्धन्यः' पद की अनुवृत्ति आती है। इस प्रकार जब सह् धातु 'साड्' रूप में परिवर्तित हो जाय तब उस 'स्' के स्थान पर मूर्द्धन्य (ष्) हो जाता है।

उदाहरण—(१) तुरासाह्+सु (स्), (विभक्ति स् का लोप) तुरासाह्, (ह्=ढ्)—तुरासाढ्, (ढ्=ड्) तुरासाड्, ('साड्' के स्=ष्) तुराषाड् ('वाऽवसाने' से विकल्प से चर्त्व ड्=ट्)=तुराषाट्। पक्ष में—तुराषाड्। (२) तुरासाह्+औ=तुरासाहौ। (३) तुरासाह्+भ्याम्, (ह=ढ, ढ्=ड्—'जश्त्व') तुरासाड्+भ्याम् (स्=ष्)=तुराषाड्भ्याम्।

(२८५) पद—दिवः, औत। **अनुवृत्ति**—सौ। **विधिसूत्र।**

मूलार्थ—'सु' के परवर्ती होने पर दिव् शब्द को औकार अन्तादेश होता है। सुद्यौः। सुदिवौ।

विमर्श—यहाँ 'सावनडुहः' (२८१) सूत्र से 'सौ' पद की अनुवृत्ति आती है। तदनुसार अलोऽन्त्य परिभाषा की उपस्थिति से 'सु' (प्रथमा एकवचन) के पर होने पर दिव् शब्द के व् केस्थान पर 'औ' आदेश होता है।

उदाहरण—(१) सुदिव्+सु (स्), (व्=औ) सुदि+औ+स् (इ=य्—'यण्') सुद्यौ स् (स्=रुत्व-विसर्ग)=सुद्यौः। (२) सुदिव्+औ=सुदिवौ।

(२८६) पद—दिवः, उत। **अनुवृत्ति**—पदान्तात। **विधिसूत्र।**

मूलार्थ—पदान्त में दिव् शब्द के उकार अन्तादेश होता है। सुद्युभ्याम्—इत्यादि। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः।

चतुर्भ्यः—२ । (२८७) षट्चतुर्भ्यश्च ७।१।५५ । एभ्य आमो नुडागमः स्यात् । (२८८) रषाभ्यां नो णः समानपदे ८।४।१ । चतुर्णाम् । (२८९) रोः सुपि ८।३।

---

(२८७) **षट्चतुर्भ्यश्चेति** । अत्र 'आमि सर्वनाम्नः सुट्' इत्यतः 'आमी'त्यनुवर्तते षष्ठ्यन्तेन विपरिणम्यते च । षडिति पदेन षट्संज्ञकमेव गृह्यते । 'ह्रस्वनद्यापो नुडि'-त्यतः 'नुट्' इत्यनुवर्तते । तदाह—**एभ्य इत्यादि** ।

(२८८) **चतुर्णामिति** । चतुर्शब्दादामि 'षट्चतुर्भ्यश्चे'ति आमो नुडागमेऽनुबन्धलोपे टित्वादाद्यावयवे 'चतुर् न् आम्' इति जाते 'रषाभ्यां नो णः समानपदे' इति णत्वे 'अचो रहाभ्यां द्वे' इति णकारस्य द्वित्वे कृते चतुर्ण्णामिति ।

(२८९) **रोः सुपीति** । 'खरवसानयोः' इत्यतः 'खरि' इति, 'विसर्जनीयः' इति

विमर्श—प्रकृत सूत्र में 'एङः पदान्तादति' (४८) से 'पदान्तात्' की अनुवृत्ति आ रही है, जो सप्तम्यन्त में परिवर्तित हो जाता है। इस प्रकार 'पदान्त में स्थित दिव् के 'व्' के स्थान पर 'उ' हो जाता है।

उदाहरण—(३) सुदिव्+भ्याम् ('सुदिव्' की पदसंज्ञा होने से व्=उ)—सुदि+उ+भ्याम् (इ=य् 'यण्')—सुद्युभ्याम् ।

रकारान्त चतुर् (=चार) शब्द के रूपों की रचना-प्रक्रिया प्रदर्शित की जा रही है। यह शब्द बहुवचनान्त है।

(१) चतुर्+जस् (अस्), (उ के बाद आम् (आ)—'चतुरनडुहोः०') चतु आर्+अस्, (उ=व् 'यण्')—चत्वारस् (स्=रुत्व-विसर्ग)=चत्वारः । (२) चतुर्+शस् (अस्)—चतुरस् (स्=रुत्व-विसर्ग)=चतुरः । (३) चतुर्+भिस् (स्=रुत्व-विसर्ग)=चतुर्भिः । (४) चतुर्+भ्यस् (स्=रुत्व-विसर्ग)=चतुर्भ्यः ।

(२८७) पद—षट्, चतुर्भ्यः, च । **अनुवृत्ति**—नुट्, आमि । **विधिसूत्र** ।

मूलार्थ—षट्संज्ञक और चतुर् शब्द से पर आम् को 'नुट्' का आगम होता है।

विमर्श—यहाँ 'आमि सर्वनाम्नः' (७।१।५२) से 'आमि' (विभक्ति-विपरिणाम द्वारा आमः) तथा 'ह्रस्वनद्यापो नुट्' (१६५) से 'नुट्' की अनुवृत्ति लाई जाती है। नुट् में टकार की इत्संज्ञा होने से 'आम्' का आद्यवयव होगा। इस प्रकार—'षट्संज्ञक तथा चतुर् शब्द से परवर्ती आम् के आदि में 'न्' आगम होता है।

(२८८) पद—रषाभ्याम्, नः, णः समानपदे । **विधिसूत्र** ।

मूलार्थ—समानपद (एक पद) में रेफ और षकार से परे 'न्' के स्थान में 'ण्' आदेश होता है। चतुर्ण्णाम् ।

विमर्श—सूत्र स्वतः पूर्ण है।

उदाहरण—(५) चतुर्+आम्, (नुट् का आगम) चतुर्+न् आम्, (न्=ण् 'रषाभ्याम्०') चतुर्णाम्, (ण् को विकल्प से द्वित्व—'अचो रहाभ्यां द्वे')=चतुर्ण्णाम् । पक्ष में—चतुर्णाम् ।

(२८९) पद—रोः, सुपि । **अनुवृत्ति**—खरि, विसर्जनीयः । **नियमसूत्र** ।

मूलार्थ—सप्तमी बहुवचन 'सुप्' विभक्ति के परे रहते 'रु' सम्बन्धी रेफ के स्थान में ही विसर्ग होता है, अन्य रेफ को नहीं। चतुर्षु ।

१६। रोरेव विसर्जनीयः सुपि, नान्यरेफस्य। चतुर्षु। (२९०) **मो नो धातोः** ८।२।६४। पदान्ते। प्रशान्। प्रशामौ। (२९१) **किमः कः** ७।२।१०३। विभक्तौ। कः। कौ। के। इत्यादि। (२९२) **इदमो मः** ७।२।१०८। इदमो मस्य मः स्यात्सौ

चानुवर्तते। तेन सुपीत्यनेन सप्तमीबहुवचनस्यैव ग्रहणम्, न तु प्रत्याहारस्य। तत्र 'खरवसानयोः' इत्येव विसर्गे सिद्धे नियमार्थमिदं सूत्रम्। अत एव 'चतुर्षु' इत्यत्र नानेन विसर्गः।

(२९०) **'मो नो धातोः' इति**। पदस्येत्यधिकृतम्। 'स्कोः' इत्यतः 'अन्ते' इत्यनुवर्तते। 'मान्तस्य धातोर्नः स्यात् पदान्ते' इति सूत्रार्थः।

(२९१) **किमः क इति। विभक्ताविति**। 'अष्टन आ विभक्तौ' इत्यतस्तदनुवृत्ते-रिति भावः।

(२९२) **इदमो म इति**। अत्र 'तदोः सः सौ' इत्यतः 'सावि'त्यनुवर्तते। 'इदम्' शब्दस्य मस्य मः स्यात् सौ' इत्यर्थः। मकारस्य मकारविधानं 'त्यदादीनामः' इत्यत्व-बाधनार्थम्।

विमर्श—सूत्र में आदेशवाचक पद का अभाव है। अतः 'खरवसानयोः०' (८।३।१५) से 'विसर्जनीयः' पद की अनुवृत्ति आती है। यह नियम सूत्र है। तदनुसार सप्तमी एकवचन सुप् में 'रु' के स्थान पर ही विसर्ग होता है, अन्य रेफ को नहीं।

उदाहरण—(६) चतुर्+सुप् (सु), (स्=ष्—'आदेशप्रत्यययोः') चतुर्षु ('खरव-सानयोः०' से र्= : की प्राप्ति 'रोः सुपि' नियम से विसर्ग नहीं हुआ) 'अचो०' से ष् को द्वित्व प्राप्त, उसका 'शरोऽचि' से निषेध)=चतुर्षु।

(२९०) पद—मः, नः, धातोः। **अनुवृत्ति**—पदस्य, अन्ते। **विधिसूत्र।**

मूलार्थ—पदान्त में मान्त धातु के 'म्' के स्थान में 'न्' आदेश होता है। प्रशान्।

विमर्श—'पदस्य' का अधिकार है। 'स्कोः संयोगाद्योरन्ते च' (८।२।२९) से 'अन्ते' की अनुवृत्ति आती है। तदनुसार—पद के अन्त में स्थित धातु सम्बन्धी 'म्' को 'न्' आदेश होता है।

उदाहरण—(१) प्रशाम्+सु, ('सु' विभक्ति का लोप) प्रशाम्, (म्=न्)=प्रशान्। (२) प्रशाम्+औ=प्रशामौ।

(२९१) पद—किमः, कः। **अनुवृत्ति**—विभक्तौ। **विधिसूत्र।**

मूलार्थ—विभक्ति के पर रहते 'किम्' के स्थान में 'क' आदेश होता है। कः। कौ। के।

विमर्श—यहाँ 'अष्टन आ विभक्तौ' (३२१) से निमित्त-वाचक 'विभक्तौ' पद की अनुवृत्ति आ रही है। क आदेश (क्+अ) अनेकाल् होने से सम्पूर्ण 'किम्' के स्थान में होगा।

उदाहरण—(१) किम्+सु (स्), (किम्=क)—क+स्, (स्=र्=:)=कः। (२) किम्+औ, (किम्=क)—क+औ (अ+औ='औ'—'वृद्धि')=कौ। (३) किम्+अस्, (किम्=क)—क+जस्, (जस्=शी)—क+ई, (अ+ई='ए'—गुण)=के। शेष रूप सर्व शब्द की तरह बनेंगे।

(२९२) पद—इदमः, मः। **अनुवृत्ति**—सौ। **विधिसूत्र।**

मूलार्थ—'सु' के पर रहते 'इदम्' शब्द के 'म्' के स्थान में 'म्' ही आदेश होता है। 'त्यदादीनामः' से प्राप्त अ आदेश का यह अपवाद है।

परे। त्यदाद्यत्वापवादः। (२९३) इदोऽय् पुंसि ७।२।१११। इदम इदोऽय् सौ पुंसि। अयम्। त्यदाद्यत्वे। (२९४) अतो गुणे ६।१।९७। अपदान्तादतो गुणे पररूपमेकादेशः स्यात्। (२९५) दश्च ७।२।१०९। इदमो दस्य मः स्याद्विभक्तौ। इमौ। इमे। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः। (२९६) अनाप्यकः ७।२।११२।

---

(२९३) **इदोऽयिति**। 'यः सौ' इत्यतः सावित्यनुवर्तते। **अयमिति**। 'इदम्+सु' इत्यत्र 'त्यदादीनामः' इति प्राप्तमकारं प्रबाध्य 'इदमो मः' इति मस्य मकारे कृते 'इदम्+स्' इति स्थिते 'इदोऽय् पुंसि' इति इद्भागस्य अयादेशे, 'हल्ङ्याब्भ्यः' इति सस्य लोपे अयमिति।

(२९४) **अतो गुणे इति**। अत्र 'एङि पररूपमि'त्यतः पररूपमित्यनुवर्तते, 'उस्यपदान्तादि'त्यत अपदान्तादिति च। तदाह—**अपदान्तादित्यादि**।

(२९५) **दश्चेति**। 'इदमो मः' इत्यत इदम इति, 'अष्टन आ विभक्तौ' इत्यतः विभक्ताविति चानुवर्तते। तदाह—**इदमो दस्येत्यादिना। इमाविति**। 'इदम्+औ' इत्यत्र 'त्यदादीनामः' इति मस्य अत्वे 'अतो गुणे' इति पररूपे 'इद+औ' इति जाते 'दश्चे'त्यनेन दकारस्य मकारे वृद्धौ च कृतायाम् 'इमौ' इति रूपम्।

विमर्श—यहाँ 'तदोः सः सावनन्त्ययोः' (७।२।१०६) से 'सौ' पद की अनुवृत्ति आने से—सु विभक्ति के परवर्ती होने पर इदम् शब्द के मकार के स्थान पर 'म्' ही आदेश होता है।

(२९३) पद—इदः, अय्, पुंसि। **अनुवृत्ति**—इदमः, सौ। **विधिसूत्र**।

मूलार्थ—'इदम्' शब्द के 'इद्' भाग को 'अय्' आदेश होता है, पुँल्लिङ्ग में 'सु' के परे रहते। अयम्।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'इदमो मः' (२९२) से 'इदमः' तथा 'यः सौ' (७।२।११०) से 'सौ' पद की अनुवृत्ति आ रही है। तदनुसार 'पुंलिङ्ग में सु विभक्ति के परे रहते 'इदम्' शब्दावयव इद् के स्थान पर 'अय्' आदेश होगा।

उदाहरण—इदम्+सु (इद्=अय्) अय्-अम्+स् ('स्' विभक्ति का लोप)=अयम्।

(२९४) पद—अतः, गुणे। **अनुवृत्ति**—अपदान्तात्, पररूपम्। **विधिसूत्र**।

मूलार्थ—अपदान्त अकार से गुण पर रहते पूर्व-पर के स्थान में पररूप एकादेश होता है।

विमर्श—प्रकृत सूत्र में 'उस्यपदान्तात्' (६।१।९६) से 'अपदान्तात्' तथा 'एङि पररूपम्' से 'पररूपम्' की अनुवृत्ति आ रही है। तदनुसार—'पदान्त-भिन्न ह्रस्व अकार से गुणसंज्ञक वर्ण (अ, ए, ओ) पश्चाद्वर्ती रहने पर पूर्व-पर वर्णों के स्थान में परवर्ण रूप एकादेश हो जाता है।

(२९५) पद—दः, च। **अनुवृत्ति**—इदमः, मः, विभक्तौ। **विधिसूत्र**।

मूलार्थ—विभक्ति के परवर्ती रहने पर 'इदम्' शब्द सम्बन्धी दकार के स्थान में मकार आदेश होता है। इमौ। इमे। त्यदादि शब्दों का सम्बोधन में प्रयोग नहीं होता।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'इदमो मः' (२९२) सूत्र तथा 'अष्टन आ०' से 'विभक्तौ' पद की अनुवृत्ति आती है। तदनुसार (सुभिन्न) विभक्ति के परे रहते 'इदम्' शब्द के 'द्' के स्थान पर 'म्' आदेश होता है।

उदाहरण—(१) इदम्+औ (म्=अ 'त्यदादीनामः' इद अ+औ, (अ+अ='अ'

अककारस्य इदम इदोऽन्, आपि विभक्तौ । 'आबि'ति प्रत्याहारः । अनेन । (२९७) **हलि लोपः ७।२।११३** । अककारस्य इदम इदो लोप आपि हलादौ । * नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे * । (२९८) **आद्यन्तवदेकस्मिन् १।१।२१** । एकस्मिन् क्रिय-

---

(२९६) अनाप्यक इति । 'अन् + आपि + अकः' इति पदच्छेदः । न विद्यते कोऽस्येति अक् तस्य अकः ककाररहितस्येति भावः । 'इदमो मः' इत्यत इदम इति, 'इदोऽय्०' इत्यतः इद इति, 'अष्टन आ विभक्तावि'त्यतः विभक्ताविति चानुवर्तते । एवं ककाररहितस्य 'इदम्'शब्दस्य यः इद्भागस्तस्य 'अन्' आदेशः स्यादापि विभक्तौ परत इत्यर्थः । **अनेनेति** । 'इदम् + (टा) आ' इत्यत्र 'त्यदादीनामः' इत्यकारान्तादेशे पररूपे 'इद + आ' इति जाते 'अनाप्यकः' इत्यद्भागस्य अनादेशे 'आद् गुणः' इति गुणे 'अनेन' इति रूपम् ।

(२९७) **हलि लोप इति** । पूर्वसूत्रादाप्यक इति, 'इदमो मः' इत्यतः 'इदमः' इति, 'इदोऽय्०' इत्यत इद इति 'अष्टन आ' इत्यतः विभक्ताविति चानुवर्तते । विभक्तौ हलीत्यस्य विशेषणत्वेन तदादिविधिस्तदाह—**अककारस्येत्यादि** । **नानर्थक इति** । अभ्यासविकारं वर्जयित्वाऽनर्थकेऽलोऽन्त्यविधिर्न भवतीत्यर्थः । अभ्यासविकारे त्वनर्थकेऽपि तत्प्रवर्त्तते यथा 'विभर्ति' ।

पररूप—'अतो गुणे')—इद+औ (द्=म्—'दश्च') इम+औ (पूर्वसवर्णदीर्घ का बाधकर अ+औ='औ'—वृद्धि)=इमौ । (२) इदम्+जस् (म्=अ) इद+अ+जस् , (अ+अ='अ'—पररूप)—इद+जस् , (जस्=शी–ई)—इद+ई (द्=म्—'दश्च') इम+ई(अ+ई='ए'—गुण)=इमे ।

(२९६) पद—अन्, आपि, अकः । **अनुवृत्ति**—इदमः, इदः, विभक्तौ । **विधिसूत्र ।**

मूलार्थ—'आप्' विभक्ति के पर रहते ककाररहित इदम् शब्द के 'इद्'भाग को 'अन्' आदेश होता है । टा से लेकर 'सुप्' के पकार पर्यन्त 'आप्' प्रत्याहार है । अनेन ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'इदमो मः' (२९२) से 'इदमः', 'इदोऽय् पुंसि' (२९३) से 'इदः' तथा 'अष्टन आ विभक्तौ' (३२१) से 'विभक्तौ' पद की अनुवृत्ति लाई जा रही है । आप् प्रत्याहार के अन्तर्गत तृतीया एकवचन टा (आ) से लेकर सुप् (सप्तमी बहुवचन) पर्यन्त विभक्तियों का समावेश होता है ।

उदाहरण—(३) इदम्+टा (म्=अ, पररूप) इद+टा (इद्=अन्—'अनाप्यकः') अन+टा (टा=इन)—अन+इन (अ+इ='ए'—गुण)=अनेन ।

(२९७) पद—हलि, लोपः । **अनुवृत्ति**—आपि, अकः, इदमः, इदः । **विधिसूत्र ।**

मूलार्थ—हलादि आप् विभक्ति के पर रहते, ककार-रहित इदम् शब्द के इद्भाग का लोप होता है । ('अभ्यास-विकार को छोड़कर अनर्थक में अलोऽन्त्य परिभाषा की प्रवृत्ति नहीं होती' परि०) ।

विमर्श—यहाँ—'इदमो मः' (२९२) से 'इदमः', 'इदोऽय्०' (२९३) से 'इद्', 'अनाप्यकः' (२९६) से 'आपि' एवं 'अकः', तथा 'अष्टन आ०' (३२१) से विभक्तौ पदों की अनुवृत्ति अपेक्षित है । तदनुसार हलादि आप् (तृतीयादि) विभक्ति के पर रहने पर ककार रहित इदम् शब्द के अवयव 'इद्' का लोप होता है ।

माणं कार्यमादाविवान्त इव स्यात्। 'सुपि चे'ति दीर्घः। आभ्याम्। (२९९) नेद-मदसोरकोः ७।१।११। अककारयोरिदमदसोर्भिस ऐस् न स्यात्। एभिः। अस्मै।

---

(२९८) **आद्यन्तवदिति।** एकशब्दश्चात्राऽसहायवाची। सप्तम्यन्तात् 'तत्र तस्येव' इति वतिः, 'एकस्मिन्' इत्युपमेये सप्तमीदर्शनात्। वतिश्चोभाभ्यां सम्बध्यते; 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नियमात्। तदाह—**एकस्मिन्निति।** तदादितदन्तयोः क्रियमाणं कार्यं तदादौ तदन्त इवाऽसहाये केवलेऽपि स्यादित्यर्थः। **आभ्यामिति।** 'इदम्+भ्याम्' इत्यत्र 'त्यदादीनामः' इत्यकारान्तादेशे पररूपे 'इद+भ्याम्' इति जाते 'हलि लोपः' इतीद्भागस्य लोपे प्राप्ते 'अन्लोऽन्त्यस्ये'ति अत्यस्य लोपे प्राप्ते 'नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे' इति परिभाषयाऽलोऽन्त्यविध्यभावे इद्भागस्यैव लोपे 'अ+भ्यामि'ति स्थिते 'आद्यन्तवदेकस्मिन्' इति एकस्मिन्नेवाकारेऽन्तवद्भावेन अदन्तत्वात् 'सुपि चे'ति दीर्घे कृते 'आभ्यामि'ति।

(२९९) **नेदमदसोरकोरिति।** अत्र 'अतो भिस ऐस्' इत्यतो 'भिस ऐसि'त्यनु-

---

यहाँ अलोऽन्त्य परिभाषा की प्रवृत्ति इद्भाग के अनर्थक होने से नहीं हुई। क्योंकि—'अभ्यास (द्वित्व के पूर्व भाग) को छोड़कर अन्यत्र अनर्थक में अलोऽन्त्यपरिभाषा से विधि नहीं होती।'

(२९८) पद—आद्यन्तवद्, एकस्मिन्। **अतिदेशसूत्र।**

मूलार्थ—एक (असहाय) में किया जाने वाला कार्य आदि और अन्त की तरह होता है। 'सुपि च' से दीर्घ—आभ्याम्।

विमर्श—यह अतिदेशसूत्र है। एक शब्द यहाँ असहायवाची है। इस प्रकार जहाँ एक ही वर्ण को मानकर आदि या अन्त सम्बन्धी कोई विधान करना हो तो ऐसी अवस्था में उसी (एक) में आदिवत् तथा अन्तवद्भाव हो जाता है। यह लोकन्याय से सिद्ध है। यथा—'देवदत्तस्यैक एव पुत्रः, स एव ज्येष्ठः, स एव कनिष्ठः, स एव मध्यमः।' अर्थात् किसी व्यक्ति का एक ही पुत्र होने पर उसी में ज्येष्ठ, मध्यम एवं कनिष्ठादि का व्यवहार होता है। इसी को व्यपदेशिवद्भाव भी कहा जाता है।

उदाहरण—(४) इदम्+भ्याम्, (द्=अ, पररूप)—इद+भ्याम्, (अलोऽन्त्य परिभाषा की उपस्थिति से 'हलि लोपः' सूत्र द्वारा 'द्' के लोप की प्राप्ति, 'नानर्थके०' से निषेध होकर इद्भाग का लोप) अ+भ्याम्, ('आद्यन्तवदेकस्मिन्' से 'अ' को ही आदि और अन्त मानकर 'सुपि च' से अदन्त अंग 'अ'='आ'—दीर्घ=आभ्याम्।

(२९९) पद—न, इदमदसोः, अकोः। **अनुवृत्ति**—भिसः, ऐस्। **विधि (निषेध) सूत्र।**

मूलार्थ—ककार रहित इदम् औ अदस् शब्द से परे 'भिस्' को ऐस् नहीं होता। एभिः। अस्मै। एभ्यः। अस्मात्। अस्य। अनयोः। एषाम्। अस्मिन्। एषु।

विमर्श—प्रकृत सूत्र में 'अतो भिस ऐस्' (१५९) से 'भिसः' पदों की अनुवृत्ति आ रही है। तदनुसार ककार युक्त प्रत्ययों से रहित इदम् तथा अदस् शब्द से पश्चाद्वर्ती 'भिस्' के स्थान पर 'ऐस्' आदेश नहीं होगा।

उदाहरण—(१) इदम्+भिस् (म्=अ—'त्यदादीनामः', पररूप)—इद+भिस् ('इद्'

एभ्यः-२ । अस्मात् । अस्य । अनयोः । एषाम् । अस्मिन् । एषु । (३००) द्वितीयाटौस्स्वेनः २।४।३४ । द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानम्-अन्वादेशः । यथा-'अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापये'ति । 'अनयोः पवित्रं कुलम्, एनयोः प्रभूतं

वर्तते । अकोरिति षष्ठी । तदाह—**अककारयोरित्यादिना । अस्मै इति ।** 'इदम् ए' इत्यत्र त्यदाद्यत्वे पररूपे स्मैभावे कृते हलि लोपः ।

(३००) **द्वितीयाटौस्स्वेन इति ।** द्वितीया च, टा च ओश्चेति द्वितीयाटौसः, तेष्विति द्वन्द्वः । 'इदमोऽन्वादेशे' इत्यत इदम इति, अन्वादेशे इति, 'एतदस्त्रतसोः' इत्यत एतदिति चानुवर्तते । तदाह— **द्वितीयायामित्यादि ।**

का लोप-'हलि लोपः')—अ+भिस् ('अतो भिस०' से भिस्=ऐस् प्राप्त, उसका 'नेदमदसोरकोः' से निषेध, 'बहुवचने झल्येत्' से अ=ए)—ए भिस् (स्=रु=ः)=एभिः । (२) इदम्+ङे, (म्=अ, पररूप) इद+ङे, (ङे=स्मै)—इद+स्मै ('इद्'भाग का लोप)=अस्मै । (३) इदम्+भ्यस् (पूर्ववत्, एत्व)=एभ्यः । (४) इदम्+ङसि, (अ, पूर्वरूप)—इद+ङसि, (ङसि=स्मात्) इद+स्मात्, ('इद्' का लोप)=अस्मात् । (५) इदम्+ङस् (अ, पररूप) इद+ङस्, (ङस्=स्य)—इद+स्य, (इद्भाग का लोप)=अस्य । (६) इदम्+ओस् (म्=अ, पररूप)—इद+ओस्, इद्=अन्—'अनाप्यकः') अन्+अ+ओस् ('ओसि च' से अ=ए) अने+ओस् (ए=अय् आदेश)—अनयोस् (स्=रु=ः)=अनयोः । (७) इदम्+आम् (म्=अ, पररूप) इद+आम्, (सुट् (स्) का आगम)—इद+स्+आम्, (इद्भाग का लोप) अ+स्+अम् (अ=ए)—एसाम्, (स्=ष्)=एषाम् । (८) इदम्+ङि, (म्=अ, पररूप)—अद+ङि (ङि=स्मिन्, इद्भाग का लोप)=अस्मिन् । (९) इदम्+सुप् (सु), (अ, पररूप)—इद+सु (इद् का लोप, एत्व) एसु (स्=ष्)=एषु ।

मकारान्त सर्वनाम इदम् (=यह) शब्द के रूप (पुंल्लिङ्ग)

	एक०	द्वि०	बहु०		एक०	द्वि०	बहु०
प्र०	—अयम्	इमौ	इमे	पं०	—अस्मात्	आभ्याम्	एभ्यः
द्वि०	—इमम्	इमौ	इमान्	ष०	—अस्य	अनयोः	एषाम्
तृ०	—अनेन	आभ्याम्	एभिः	स०	—अस्मिन्	अनयोः	एषु
च०	—अस्मै	आभ्याम्	एभ्यः				

प्रचुरप्रयोगादर्शनात् त्यदादेः सम्बोधनं नास्ति ।

(३००) **पद**—द्वितीयाटौस्सु, एनः । **अनुवृत्ति**—एतदः, इदमः, अन्वादेशे, अनुदात्तः । **विधिसूत्र ।**

मूलार्थ—अन्वादेश में द्वितीया विभक्ति एवम् टा और ओस् विभक्ति पर रहते इदम् और एतद् शब्द के स्थान में 'एन' आदेश होता है । किसी कार्य के विधान के लिए जिसका उपादान किया गया हो, उसी का कार्यान्तर विधान के लिए पुनः उपादान करना अन्वादेश है । जैसे—'इसने व्याकरण पढ़ लिया, अब छन्द पढ़ाओ' । 'इन दोनों का कुल बड़ा पवित्र है, इनके पास बहुत धन भी है ।' एनम् । एनौ । एनान् । एनेन । एनयोः-२ । राजा ।

स्वमि'ति । एनम् । एनौ । एनान् । एनेन–२ । एनयोः । राजा । (३०१) न ङिसम्बु-द्धयोः ८।२।८ । नस्य लोपो न स्यात् ङौ सम्बुद्धौ च । हे राजन् । * ङावुत्तरपदे प्रतिषेधः * । ङौ तुच्छन्दस्युदाहरणम् । परमे व्योमन् सर्वा भूतानि । ब्रह्मनिष्ठः । राजानौ । राजानः । राजानम् । राजानौ । जञोर्ज्ञः । अल्लोपोऽनः । चुत्वम् । राज्ञः ।

---

(३०१) **न ङिसम्बुद्धयोरिति** । 'नलोपः०' इत्यतः 'न' इति लुप्तषष्ठीकं 'लोपः' इति चानुवर्तते । तदुक्तं—**ङौ सम्बुद्धौ चेति** । **ङावुत्तरेति** । समासोत्तरपदे परतो यो ङिस्तस्मिन्परे 'न ङिसम्बुद्धयोः' इति प्राप्तस्य निषेधस्य प्रतिषेधो वक्तव्य इति निष्कृष्टोऽर्थः । तेन 'ब्रह्मनिष्ठः' इत्यत्र नलोपो भवत्येव, समासे 'निष्ठा' इत्यस्योत्तर-पदत्वात् ।

विमर्श—सूत्र में स्थानीवाचक पद का अभाव है । अतः 'इदमोऽन्वादेशे' (२।४।३२) से 'इदमः' तथा 'अन्वादेशे' एवम् 'एतदस्त्रतसोः' (२।४।३३) से 'एतदः' की अनुवृत्ति की जाती है । इस प्रकार द्वितीया विभक्ति, टा और ओस् के परवर्ती रहने पर अन्वादेश में इदम् तथा एतद् शब्द के स्थान पर 'एन' आदेश होता है । किसी कार्य के सम्पन्न करने में पूर्व में ही किसी की प्रवृत्ति हो चुकी हो, पुनः उसी को अन्य कार्य के लिए प्रेरित करना 'अन्वादेश' कहलाता है । अनेकाच् होने से 'एन' सर्वादेश है । उदाहरण—'अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापय' वाक्य में किसी ने अपने पुत्र आदि के व्याकरण अध्ययन के विषय में ज्ञात कराया । पुनः उसको वेद पढ़ाने के लिए निवेदन किया । यहाँ द्वितीय वाक्य में एन आदेश युक्त 'एनम्' पद का प्रयोग किया गया है । इदम्+अम् (इदम्=एन) एन+अम् (पूर्वरूप) =एनम् । इसी प्रकार—'अनयोः कुलं पवित्रम्, एनयोः प्रभूतं स्वमिति ।' इस वाक्य में भी 'एनयोः' अन्वादेश का रूप है । षष्ठी द्विवचन में—एतद्+ओस्, (एतद्=एन)—एन+ओस् (अ=ए—'ओसि च') एने+ओस् (ए=अय् आदेश)—एनयोस् (स्=रु=:)= एनयोः । इसी प्रकार अन्वादेश में एनौ (औ), एनान् (शस्), एनेन (टा) रूप बनेंगे ।

नकारान्त पुंल्लिङ्ग राजन् (=राजा) शब्द के रूपों की रचना-प्रक्रिया का उल्लेख किया जा रहा है—राजन्+सु (उपधा दीर्घ)—राजान्+य्, ('स्' का लोप—'हल्ङ्याब्भ्यः') राजान् ('न्' का लोप—'नलोपः प्राति०')=राजा ।

(३०१) पद—न, ङि, सम्बुद्धयोः । **अनुवृत्ति**—नलोप । **विधि(निषेध)सूत्र ।**

मूलार्थ—'ङि' और 'सम्बुद्धि' (सम्बोधन का एकवचन 'सु') के पर होने पर 'न्' का लोप नहीं होता । हे राजन् ।

विमर्श—सूत्रार्थ की पूर्णता के लिए 'नलोपः प्रातिपदिकान्तस्य' (२०२) से 'नलोपः' की अनुवृत्ति आती है । यह सूत्र 'नलोपः प्राति०' का बाधक है ।

उदाहरण—हे राजन्+सु (स् का लोप हो जाने पर 'नलोपः प्राति०' से 'न्' के लोप की प्राप्ति, उसका 'न ङिसम्बुद्धयोः' से निषेध)=हे राजन् !

(वा०) 'ङि' के विषय में उत्तरपद पर रहते 'न ङिसम्बुद्धयोः' से प्राप्त नलोप के निषेध का प्रतिषेध कहना चाहिए । इस वार्तिक द्वारा ब्रह्मन्+निष्ठः='ब्रह्मनिष्ठः' इत्यादि समासयुक्त स्थान में नलोप हो जाने से इष्ट रूप निष्पन्न होता है ।

(३०२) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति ८।२।२। सुब्विधौ, स्वरविधौ, संज्ञाविधौ, कृति-तुग्विधौ च नलोपोऽसिद्धो, नान्यत्र —'राजाश्व' इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्याम्। राजभिः। राजभ्यः। राज्ञि–राजनि। यज्वा। यज्वानौ। यज्वानः। **(३०३) न संयोगाद्वमन्तात् ६।४।१३७।** वमन्तसंयोगादनो-

---

(३०२) **नलोप इति।** सुप्च, स्वरश्च, संज्ञा च तुक् चेति द्वन्द्वः, तेषां विधयस्तेषु सम्बन्धसामान्यषष्ठ्या समासः। 'द्वन्द्वान्ते श्रूयमाणमि'ति नियमेन विधिशब्दस्य प्रत्येकं सम्बन्धः। 'पूर्वत्रासिद्धमि'त्यतः 'असिद्धमि'त्यनुवर्तते। तदाह—**सुब्विधाविति। राजभ्यामिति।** 'राजन् + भ्याम्' इत्यत्र नलोपे कृते 'नलोपः' इत्यादिना नलोपस्यासिद्धत्वात् 'सुपि चे'ति दीर्घो न भवति, राजभ्यामिति।

ङि प्रत्यय का उदाहरण वेद में प्राप्त होता है। 'परमे व्योमन्' यहाँ ङि विभक्ति 'सुपां सुलुक्०' से लोप होने पर 'न्' लोप प्राप्त था, उसका प्रकृत सूत्र द्वारा निषेध किया गया है।

(१) राजन्+औ (उपधादीर्घ)=राजानौ। (२) राजन्+जस् (अस्)—(उपधादीर्घ) —राजानस्, (स्=रु= :)=राजानः। (३) राजन्+अम् (उपधादीर्घ)—राजानम्। (४) राजन्+(औट्) औ (उपधादीर्घ)=राजानौ। (५) राजन्+(शस्) अस्, ('अन्' के 'अ' का लोप—'अल्लोपोऽनः') राज्न्+अस्, (न्=ञ्—श्चुत्व) राज् ञ्+अस् (ज्+ञ=ज्ञ्)—राज्ञस् (स=र्= :)=राज्ञः।

(३०२) पद—नलोपः, सुप्स्वरसंज्ञातुग्विधिषु, कृति। **अनुवृत्ति**—असिद्धः। **नियमसूत्र।**

मूलार्थ—सुप्विधि, स्वरविधि, संज्ञाविधि तथा कृत्प्रत्ययपरक तुक्विधि में न का लोप असिद्ध रहता है, अन्यत्र 'राजाश्वः' इत्यादि प्रयोगों में असिद्ध नहीं रहता। इस प्रकार नलोप असिद्ध होने से आत्व, एत्व तथा ऐस् विधियाँ नहीं होतीं। राजभ्याम्। राजभिः। राजभ्यः। राज्ञि। राजनि। यज्वा। यज्वानौ। यज्वानः।

विमर्श—यहाँ 'पूर्वत्राऽसिद्धम्' (८।२।१) से विभक्ति-विपरिणाम के द्वारा 'असिद्धः' पद की अनुवृत्ति आती है। तदनुसार सुप्विधि (कार्य), स्वर्विधि, संज्ञाविधि तथा कृत्प्रत्यय पर रहने पर तुक् (आगम) विधि में 'न्' का लोप असिद्ध होता है। इनके अतिरिक्त दीर्घ आदि कार्यों में नलोप असिद्ध नहीं होता। यथा—(राज्ञः अश्वः) राजन्+अश्वः (न् लोप) राज+अश्वः (न् का लोप असिद्ध न होने से सवर्णदीर्घ)=राजाश्वः।

उदाहरण—(१) राजन्+भ्याम् ('न्' लोप होने पर, प्रकृत सूत्र द्वारा नलोप असिद्ध हो जाने से 'सुपि च' से दीर्घ नहीं होता)=राजभ्याम्। (२) राजन्+भिस् ('न' का लोप) राजभिस् (स्=रु=:)=राजभिः (यहाँ न लोप असिद्ध होने से भिस्=ऐस् नहीं होता। (३) राजन्+भ्यस् (नलोप, स=र्=:)=राजभ्यः (यहाँ न् लोप असिद्ध होने से 'बहुवचने झल्येत्' से एत्व नहीं होता)। (४) राजन्+ङि (इ), ('अन्' के अ का विकल्प से लोप—'विभाषा ङिश्योः') राज् न्+इ (श्चुत्व न्=ञ्, ज्+ञ्=ज्ञ्)=राज्ञि। पक्ष में—राजनि।

(१) यज्वन् (=यज्ञकर्ता)+सु (स्), (उपधादीर्घ सु लोप) यज्वान् (न् का लोप) =यज्वा। (२) यज्वानौ (३) यज्वानः (राजन् शब्द की तरह बनते हैं)।

(३०३) पद—न संयोगात्, वमन्तात्। **अनुवृत्ति**—अल्लोपः, अनः। **विधि(निषेध)सूत्र।**

ऽकारस्य लोपो न । यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा । (३०४) **इन्हन्पूषार्यम्णां शौ ६।४।१२ । एषां शावेवोपधाया दीर्घः । (३०५) सौ च ६।४।१३ । इन्नादीनामुपधाया दीर्घोऽसम्बुद्धौ सौ । वृत्रहा । हे वृत्रहन् । (३०६)**

---

(३०३) **न संयोगादिति ।** वश्च मश्चेति द्वन्द्वः, वयावन्तौ यस्येति बहुव्रीहिः । 'अल्लोपोऽनः' इति सूत्रमनुवर्तते । अन्तग्रहणं स्पष्टार्थम् । तदाह—**वमन्तेत्यादिना ।**

(३०४) **इन्हन्निति ।** 'ढ्रलोपे' इत्यतो दीर्घ इति, 'नोपधायाः' इत्यत उपधाया इति चानुवर्तते । 'सर्वनामस्थाने चासम्बुद्धौ' इत्येव दीर्घे सिद्धे नियमार्थमिदमित्याह— **शावेति ।**

(३०५) **सौ च इति ।** 'शौ'वर्जं इन्हन्निति सूत्रम्, 'ढ्रलोपे' इत्यतो दीर्घ इति, 'सर्वनामस्थाने' इत्यतः 'असम्बुद्धौ' इति चानुवर्तते । तदाह—**इन्नादीनामिति । वृत्रहा इति ।** वृत्रं हतवानिति वृत्रहा इन्द्रः । 'वृत्रहन्+सु' इत्यत्र 'हल्ङ्याब्भ्यः' इति सुलोपे 'सौ च' इति दीर्घे 'नलोपः प्रातिपदिकान्तस्ये'ति नलोपे 'वृत्रहा' इति ।

मूलार्थ—वकारान्त और मकारान्त संयोग से परे 'अन्' के अकार का लोप नहीं होता । यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा ।

विमर्श—सूत्रार्थ की पूर्णता के लिए सम्पूर्ण 'अल्लोपोऽनः' सूत्र की अनुवृत्ति लाई जा रही है । तदनुसार मकारान्त और वकारान्त संयोग से परवर्ती 'अन्' के 'अ' का लोप नहीं होता ।

उदाहरण—(१) यज्वन्+शस् (अस्) ('अल्लोपोऽनः' से प्राप्त 'अ' लोप का प्रकृत सूत्र से निषेध, क्योंकि यहाँ वकारान्त संयोग से परे अन् है, लोप नहीं हुआ) यज्वनस् (स्=र्=:)=यज्वनः । (२) यज्वन्+टा ('अ' के लोप का निषेध)=यज्वना । (३) यज्वन्+भ्याम् (न् का लोप)=यज्वभ्याम् ।

इसी प्रकार नकारान्त ब्रह्मन् शब्द से शस् में 'ब्रह्मणः' तथा 'टा' विभक्ति में 'ब्रह्मणा' रूप बनते हैं ।

(३०४) पद—इन्हन्पूषार्यम्णां, शौ । **अनुवृत्ति**—दीर्घः, उपधायाः । **नियमसूत्र ।**

मूलार्थ—केवल 'शि' के पर रहते—इन्, हन्, पूषन् और अर्यमन् शब्दों की उपधा को दीर्घ होता है; अन्यत्र नहीं ।

विमर्श—सूत्रार्थ की स्पष्टता के लिए—'ढ्रलोपे०' (६।३।१११) से 'दीर्घः' तथा 'नोपधायाः (६।४।७) से 'उपधायाः' पदों की अनुवृत्ति आती है । सूत्रस्थ नकारान्त शब्दों में 'सर्वनामस्थाने चाऽसम्बुद्धौ' सूत्र से स्वतः दीर्घ सिद्ध था; पुनः यह सूत्र नियम करता है कि इन् आदि शब्दों की उपधा को 'शि' परवर्ती होने पर ही दीर्घ हो, अन्यत्र नहीं ।

(३०५) पद—सौ, च । **अनुवृत्ति**—इन्हन्पूषार्यम्णाम्, दीर्घः, उपधायाः, असम्बुद्धौ । **विधिसूत्र ।**

मूलार्थ—सम्बुद्धि-भिन्न 'सु' के पर रहते इन् आदि की उपधा को दीर्घ होता है । वृत्रहा । हे वृत्रहन् ।

विमर्श—यह पूर्वसूत्र का अपवाद है । 'इन्हन्पूषार्यम्णाम्', 'ढ्रलोपे' (६।३।१११) से 'दीर्घः', 'सर्वनामस्थाने' (६।४।८) से 'असम्बुद्धौ' पदों की अनुवृत्ति आ रही है । तदनुसार—'सम्बुद्धि-भिन्न सु विभक्ति के परवर्ती होने पर इन्, हन्, पूषन् और अर्यमन् शब्दों की उपधा को दीर्घ होता है ।

एकाजुत्तरपदे णः ८।४।१२। एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात् परस्य प्रातिपदिकान्त-नुम्-विभक्तिस्थस्य नस्य णत्वं स्यात्। वृत्रहणौ। वृत्रहणः।
(३०७) हो हन्तेर्ञ्णिन्नेषु ७।३।५४। ञिति णिति प्रत्यये ने च परे हन्तेर्हस्य कुत्वं

---

(३०६) **एकाजिति।** एकः अच् यस्मिन् तत् एकाच्। उत्तरपदश्च समासस्य चरमावयवे रूढः, तेन समास आक्षिप्यते। अत्र 'रषाभ्यां णो नः' इति, 'पूर्वपदात्संज्ञायामि'त्यतः 'पूर्वपदादि'ति, 'प्रातिपदिकान्तनुम्विभक्तिषु च' इति चानुवर्तते। तदाह—**एकाजुत्तरपदमित्यादिना।** 'वृत्रहणावि'त्यत्र एकाजुत्तरपदं 'हन्' इति, तस्मिन्समासे 'वृत्रहन्नि'ति समुदायरूपे पूर्वपदं वृत्रेति, तत्र स्थितं निमित्तं रकारः, तस्मात्परस्य प्रातिपदिकान्तनकारस्य णकारः।

(३०७) **हो हन्तेरिति।** ह इति स्थानषष्ठी, हन्तेरित्यवयवषष्ठी। हन्तेरित्यत्र स्तिपा निर्देशाद् हन्धातोरिति लभ्यते। अङ्गस्येत्यधिकारात् ञ्णितोर्प्रत्ययत्वं लभ्यते। 'चजोः कु घिण्यतोः' इत्यतः 'कु' इत्यनुवर्तते। तदाह—**ञितीत्यादिना।**

उदाहरण—(१) वृत्रहन्+सु (उपधा दीर्घ)—वृत्रहान् स् (स् का लोप–'हल्ङ्याब्भ्यः') वृत्रहान् ('न्' का लोप)=वृत्रहा। (२) हे वृत्रहन्+सु (सम्बुद्धि परे होने से दीर्घ नहीं हुआ, नलोप का 'न ङि०' से निषेध, 'स्' का लोप)=हे वृत्रहन्।

(३०६) पद—एकाजुत्तरपदे णः। **अनुवृत्ति**—रषाभ्यां नः, पूर्वपदात्, प्रातिपदिकान्त-नुम् विभक्तिषु च। **विधिसूत्र।**

मूलार्थ—एक अच् है उत्तरपद में जिसके, ऐसा जो समास, उसमें पूर्वपदस्थित निमित्त रेफ सकार से परे प्रातिपदिकान्त नुम् और विभक्ति में स्थित 'न्' को 'ण्' होता है। वृत्रहणौ। वृत्रहणः।

विमर्श—सूत्र में स्थानीवाचक पद का निर्देश नहीं किया गया है। अतः 'रषाभ्यां नो णः समानपदे' (८।४।१) से 'रषाभ्याम् नः', 'पूर्वपदात्संज्ञायामगः' से 'पूर्वपदात्' तथा 'प्राति-पदिकान्तनुम्विभक्तिषु च' सूत्र की अनुवृत्ति आती है। इस प्रकार सूत्र का आशय यह है कि "जिस समस्त पद में उत्तरपद एक अच् वर्णात्मक हो, उस समास युक्त शब्द के पूर्व पद में स्थित र्, ष् से परे प्रातिपदिक के अन्त्य नकार, 'नुम्' के नकार तथा विभक्ति के नकार के स्थान पर णकार होता है।"

उदाहरण—(१) वृत्रहन्+औ (दीर्घ नहीं हुआ (३०४), 'न्'='ण्'—'एकाजुत्तरपदे णः')=वृत्रहणौ। (२) वृत्रहन्+जस् (अस्) (न्=ण्, स्=र्=ः)=वृत्रहणः।

(३०७) पद—हः, हन्तेः, ञ्णिन्नेषु। **अनुवृत्ति**—'कु'। **विधिसूत्र।**

मूलार्थ—ञित्, णित् प्रत्यय तथा नकार परे रहते हन् धातु के 'ह्' को कुत्व (कवर्ग) होता है।

विमर्श—यहाँ 'चजोः कु घिण्यतोः' (७।३।५२) से 'कु' पद की अनुवृत्ति आ रही है। 'अङ्गस्य' का अधिकार है। तदनुसार ञ्-इत्संज्ञक, ण्-इत्संज्ञक अथवा 'न्' पर रहते ह् के स्थान पर (कु) कवर्गीय वर्ण 'घ्' होता है। क्योंकि कवर्गीय वर्णों में ह् के सदृश संवार, नाद, घोष तथा महाप्राण प्रयत्नवान् 'घ्' ही है।

स्यात्। (३०८) हन्तेः ८।४।२२। उपसर्गस्थान्निमित्ताद्धन्तेर्नस्य णः। प्रहण्यात्। (३०९) अत्पूर्वस्य ८।४।२२। हन्तेरत्पूर्वस्यैव नस्य णो नान्यस्य। प्रघ्नन्ति। योगविभागसामर्थ्यादनन्तरस्य विधिर्वा भवति, प्रतिषेधो वेति न्यायं बाधित्वा 'कुमति चे'ति णत्वमपि निवर्त्तते। वृत्रघ्नः इत्यादि। एवं शार्ङ्गिन्। यशस्विन्। अर्यमन्। पूषन्। (३१०) मघवा बहुलम् ६।४।१२८। मघवन्शब्दस्य वा 'तृ' इत्यन्तादेशः। ऋ इत्।

---

(३०८) **हन्तेरिति**। 'हन्तेरत्पूर्वस्ये'ति सूत्रं योगविभागेन व्याचष्टे। 'रषाभ्यां णो नः' इति 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति चानुवर्तते। तदाह—**उपसर्गस्थादिति**।

(३०९) **अत्पूर्वस्येति**। अत्र 'हन्तेः' इति, 'रषाभ्यां नो णः' इति चानुवर्तते। उपसर्गादिति तु निवृत्तम्। हन्तेरत्पूर्वस्य नस्य णः स्यादिति लभ्यते। 'हन्तेः' इत्यनेनैव णत्वे सिद्धे नियमार्थमिदमित्याह—**हन्तेरत्पूर्वस्यैवेति**।

(३१०) **मघवेति**। 'अवर्णस्त्रसौ' इत्यतः तृ इत्यनुवर्तते। तदनुरोधात् 'मघवे'ति षष्ठ्यर्थे प्रथमा। तदाह—**मघवन्नित्यादि**।

---

(३०८) पद—हन्तेः। **अनुवृत्ति**—रषाभ्यां नः णः, उपसर्गात्। **विधिसूत्र**।

मूलार्थ—उपसर्गस्थ निमित्त से परे हन् धातु के 'न्' के स्थान पर 'ण्' होता है।

विमर्श—योगविभाग से 'हन्तेरत्पूर्वस्य' सूत्र को विभक्त कर प्रथम भाग 'हन्तेः' का विवेचन किया जा रहा है। सूत्रार्थ हेतु 'रषाभ्याम्' (८।४।१) से 'रषाभ्याम् नः णः' तथा 'उपसर्गादसमासेऽपि' (८।४।१४) से 'उपसर्गात्' की अनुवृत्ति लाई जा रही है। तदनुसार—"उपसर्ग में स्थित निमित्त 'र्' तथा 'ष्' से पर 'हन्' धातु के 'न्' के स्थान पर 'ण्' होता है।"

उदाहरण—'प्र+हन्+यात्' (यहाँ 'प्र' उपसर्ग में स्थित 'र्' से पर हन् धातु के न्=ण्) =प्रहण्यात्।

(३०९) पद—अत्पूर्वस्य। **अनुवृत्ति**—हन्तेः, रषाभ्यां नः णः, उपसर्गात्। **नियमसूत्र**।

मूलार्थ—हन् धातु के अत् (ह्रस्व अकार) पूर्वक 'न्' को ही 'ण्' होता है, अन्य को नहीं। सूत्र का योगविभाग करने से 'अनन्तरस्य विधिर्वा भवति, प्रतिषेधो वा' न्याय का बाधकर 'कुमति च' से प्राप्त णविधान की निवृत्ति हो जाती है। वृत्रघ्नः' इत्यादि।

विमर्श—'हन्तेरत्पूर्वस्य' के द्वितीय भाग की व्याख्या प्रस्तुत की जा रही है। 'अत्पूर्वस्य' में 'हन्तेः', 'रषाभ्यां नो णः' तथा 'उपसर्गात्' की पूर्ववत् अनुवृत्ति आती है। तदनुसार "ह्रस्व अकार के पूर्व में रहने पर ही हन् धातु के 'न्' को 'ण्' होता है।" सूत्र द्वितीय भाग के नियम के लिए है। पृथक् योगविभाग का फल यह है कि 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' अर्थात् अनन्तर=अव्यवहित को विधान या निषेध होता है। परिभाषा का बाधकर 'एकाजुत्तरपदे णः' (८।४।१२), 'कुमति च' (८।४।१३) तथा 'प्रातिपदिकान्त०' (८।४।११) से प्राप्त णत्व का भी यह निवर्तक होता है।

उदाहरण—वृत्रहन्+शस् (अस्), ('अ्' का लोप—'अल्लोपोऽनः')—वृत्रह् न्+अस् (ह्=घ्—'हो हन्तेर्ञ्णिन्नेषु'—वृत्रघ् नस् (यहाँ 'आ' पूर्व न होने से णत्व नहीं—'अत्पूर्वस्य' स्=र्=ः)=वृत्रघ्नः। इसी प्रकार शार्ङ्गिन्, यशस्विन्, अर्यमन् तथा पूषन् शब्दों के रूप बनेंगे।

(३१०) पद—मघवा, बहुलम्। **अनुवृत्ति**—'तृ'। **विधिसूत्र**।

(३११) उगिदचां सर्वनामस्थानेऽधातोः ७।१।७० । अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात्सर्वनामस्थाने । मघवान् । इह उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात् । मघवन्तौ । मघवन्तः । मघवन्तम् । मघवन्तौ । मघवतः । मघवता । मघवद्भ्याम् । तृत्वाभावे सुटि—राजवत् । (३१२) श्वयुवमघो-

---

(३११) **उगिदचामिति** । उक् प्रत्याहार इद् येषान्ते उगितः, ते च अच्च उगिदचस्तेषाम् । 'अच्' इति लुप्तनकारस्य 'अञ्चु गतिपूजनयोः' इति धातोर्ग्रहणम् । अधातोरित्युगितामेव विशेषणम्, न त्वचः, असम्भवात् । 'इदितो नुम्धातोः' इत्यतो नुमित्यनुवर्तते । तदाह—**अधातोरुगित इत्यादि । मघवानिति** । 'मघवन् + सु' इत्यत्र 'मघवा बहुलम्' इति विकल्पेन 'तृ' इत्यन्तादेशेऽनुबन्धलोपे मघवत् + स् इति जाते 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमि 'मघवन् त् स्' इति स्थिते 'हल्ङ्याब्भ्यः' इति सस्य लोपे, तकारस्य संयोगान्तलोपे उपधादीर्घे 'मघवान्' इति । तृत्वाभावपक्षे—'मघवा' इति ।

मूलार्थ—मघवन् शब्द को विकल्प से 'तृ' अन्तादेश होता है ।

विमर्श—'अर्वणस्त्रसावनञः' (६।४।१२७) सूत्र से 'तृ' पद की अनुवृत्ति आ रही है । अलोऽन्त्य परिभाषा द्वारा मघवन् के अन्त्य वर्ण 'न्' के स्थान पर 'तृ' आदेश होता है; 'तृ' में ऋ की इत्संज्ञा होती है ।

(३११) पद—उगिदचां, सर्वनामस्थाने, अधातोः । **अनुवृत्ति**—नुम् । **विधिसूत्र** ।

मूलार्थ—सर्वनामस्थान के पर होने पर धातुभिन्न जो उगित् और नलोपी अञ्च् धातु को 'नुम्' का आगम होता है । मघवान् । सूत्र में 'बहुल' पद का ग्रहण होने से दीर्घ की कर्तव्यता में संयोगान्त लोप असिद्ध नहीं होता । मघवन्तौ । मघवतः । मघवता । तृत्व के अभाव में मघवा । सुट् में—राजन् की तरह ।

विमर्श—यहाँ 'इदितो नुम्धातोः' (७।१।५८) से 'नुम्' की अनुवृत्ति आती है । सूत्रस्थ उगित् का तात्पर्य है—जिसमें उक्—उ, ऋ, लृ वर्णों की इत्संज्ञा हो । 'अच्' पद से नलोप युक्त 'अञ्च्' धातु का ग्रहण किया जाता है । इस प्रकार सर्वनामस्थानसंज्ञक प्रत्ययों के पश्चाद्वर्ती होने पर धातुभिन्न उगित् और नकार लोप वाले अञ्च् धातु को नुम् का आगम होता है । 'नुम्' मित् होने से अन्त्य अच् से परे होगा ।

उदाहरण—(१) मघवन्+औ, (न्=तृ–त्)—मघवत्+औ, (नुम् (न्) का आगम)—मघवन् त्+औ=मघवन्तौ । (२) मघवन्+जस् (अस्) (न्=त्), मघवत्+औ (नुम् का आगम)=मघवन्तस्, (स्=र्=:)=मघवन्तः । (३) मघवन्+अम्=मघवन्तम् (पूर्ववत्प्रक्रिया) । (४) मघवन्+औट् (औ)=मघवन्तौ । (५) मघवन्+शस् (अस्) (सर्वनामस्थान परे न होने से नुम् नहीं हुआ)—मघवतस् (स्=र्=:)=मघवतः । (६) मघवत्+टा (आ)=मघवता । (७) मघवन्+भ्याम् (न्=त्; त्=द्—जश्त्व)=मघवद्भ्याम् । तृ—अन्तादेश के वैकल्पिक होने से उसके अभाव में सुट् (सु, औ, जस्, अम्, औट्) में—राजन् शब्द की तरह रूप बनते हैं ।

नामतद्धिते ६।४।१३३। अन्नन्तानां भानामेषामतद्धिते परे सम्प्रसारणं स्यात्। मघोनः मघवभ्यामित्यादि। एवं श्वन्, युवन्। (३१३) न सम्प्रसारणे सम्प्रसारणम् ६।१।

---

(३१२) **श्वयुवमघोनामिति।** [1]श्वा च युवा च मघवा चेति द्वन्द्वस्तेषाम्। 'वसोः सम्प्रसारणमि'त्यतः सम्प्रसारणमित्यनुवर्तते। 'अल्लोपोऽनः' इत्यत अन इत्यनुकृष्यते। तच्च त्रयाणां विशेषणम्, तदन्तविधिः। भस्येत्यधिकृतमित्याह—**अन्नन्ताना-**

---

(३१२) पद—श्वयुवमघोनाम्, अतद्धिते। **अनुवृत्ति**—अनः, भस्य, सम्प्रसारणम्। **विधिसूत्र।**

मूलार्थ—तद्धितभिन्न प्रत्यय के पर रहते अन्नन्त भसंज्ञक श्वन्, युवन् और मघवन् शब्दों को सम्प्रसारण होता है। मघोनः। मघवभ्याम्—इत्यादि।

विमर्श—प्रकृत सूत्र में 'अल्लोपोऽनः' (६।४।१३४) से 'अनः' तथा 'वसोः सम्प्रसारणम्' (६।४।१३१) से 'सम्प्रसारणम्' पद की अनुवृत्ति आ रही है। 'श्वयुवमघोनाम्' का 'अनः' पद विशेषण होने से तदन्तविधि होती है। 'भस्य' का अधिकार है, विशेष्यानुसार बहुवचन में परिवर्तित हो जाता है। तदनुसार—तद्धितभिन्न प्रत्यय के परवर्ती रहने पर अन्नन्त भसंज्ञक श्वन् आदि को सम्प्रसारण होता है।

उदाहरण—(१) मघवन्+शस् (अस्), (व्=उ—'सम्प्रसारण') मघ उ अन्+अस्, (उ+अ='उ'—पूर्वरूप) मघ उ नस् (अ+उ='ओ'—गुण)—मघोनस् (स्=र्=ः) =मघोनः। (२) मघवन्+भ्याम् (न् लोप)=मघवभ्याम्। इसी प्रकार श्वन् और युवन् शब्द के रूप बनते हैं।

नकारान्त पुँल्लिङ्ग मघवन् (=इन्द्र) शब्द के रूप

'तृ' अन्तादेश पक्ष में			तृत्वाभाव पक्ष में		
एक०	**द्वि०**	**बहु०**	**एक०**	**द्वि०**	**बहु०**
प्र०–मघवान्	मघवन्तौ	मघवन्तः	प्र०–मघवा	मघवानौ	मघवानः
द्वि०–मघवन्तम्	मघवन्तौ	मघवतः	द्वि०–मघवानम्	मघवानौ	मघोनः
तृ०–मघवता	मघवद्भ्याम्	मघवद्भिः	तृ०–मघोना	मघवभ्याम्	मघवभिः
च०–मघवते	मघवद्भ्याम्	मघवद्भ्यः	च०–मघोने	मघवभ्याम्	मघवभ्यः
पं०–मघवतः	मघवद्भ्याम्	मघवद्भ्यः	पं०–मघोनः	मघवभ्याम्	मघवभ्यः
ष०–मघवतः	मघवतोः	मघवताम्	ष०–मघोनः	मघोनोः	मघोनाम्
स०–मघवति	मघवतोः	मघवत्सु	स०–मघोनि	मघोनोः	मघवसु
सं०–हे मघवन्	हे मघवन्तौ	हे मघवन्तः	सं०–हे मघवा	हे मघवानौ	हे मघवानः

---

१. अस्मिन् सूत्रे सुभाषितमेतत्प्रसिद्धं वर्तते—

'काचं मणिं काञ्चनमेकसूत्रे ग्रथ्नासि बाले किमिदं विचित्रम्। (प्रश्नः)
विचारवान् पाणिनिरेकसूत्रे श्वानं युवानं मघवानमाह॥' (उत्तरम्)

हिन्दी अर्थ—माला गूँथती हुई बाला से किसी ने प्रश्न किया कि तुम काँच, मणि और स्वर्ण को एक ही माला में क्यों गूँथ रही हो? यह तो बड़ी विचित्र स्थिति है। तब उस बाला ने उत्तर दिया कि विचारशील आचार्य पाणिनि ने भी एक ही सूत्र में श्वन् (कुत्ता), युवन् (युवक) और मघवन् (इन्द्र) को गूँथ दिया है।

३७। सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य न सम्प्रसारणम्। यूनः। युवभ्यामित्यादि। अर्वा। हे अर्वन्! (३१४) अर्वणस्त्रसावनञः ६।४।१२७। नञा रहितस्यार्वन्नित्यस्य 'तृ' इत्यन्तादेशो न तु सौ। अर्वन्तौ। अर्वन्तः।

न्निति। **मघोन इति**। 'मघवन्+(शस्) अस्' इत्यत्र भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति सम्प्रसारणे वकारस्य उकारे 'सम्प्रसारणाच्चे'ति पूर्वरूपैकादेशो 'मघ उ नस्' इति जाते 'आद् गुणः' इति गुणे, सस्य रुत्वे तस्य विसर्गे च कृते मघोनः' इति।

(३१३) **न सम्प्रसारण इति**। 'तस्मिन्निति निर्दिष्टे पूर्वस्ये'ति परिभाषया 'पूर्वस्ये'त्युपतिष्ठते। तदाह—**सम्प्रसारणे परत इत्यादि। यून इति**। 'युवन्+शस्' इत्यत्र शस्येत्संज्ञायां लोपे भसंज्ञायां 'श्वयुवमघोनामि'ति सम्प्रसारणे वकारस्योकारे पूर्वरूपे 'यु उन् अस्' इति जाते पुनः यकारस्य सम्प्रसारणे प्राप्ते, 'न सम्प्रसारणे सम्प्रसारणमि'त्यनेन निषेधे सवर्णदीर्घे सस्य रुत्वे विसर्गे च 'यूनः' इति।

(३१४) **अर्वणस्त्रसावनञ इति**। अर्वणः, तृ, असौ, अनञ इतिच्छेदः। न विद्यते नञ् यस्येति बहुव्रीहिः। अङ्गस्येत्यधिकृतम्, तच्चार्वणा विशेष्यते। तेन तदन्तविधिस्तदाह—**नञेत्यादिना**।

---

(३१३) पद—न सम्प्रसारणे, सम्प्रसारणम्। **विधि(निषेध)सूत्र।**

मूलार्थ—सम्प्रसारण पर रहते पूर्व यण् को सम्प्रसारण नहीं होता। अतः 'य्' को इकार सम्प्रसारण नहीं हुआ। यूनः। युवभ्याम्—इत्यादि।

विमर्श—सूत्र पूर्ण है। यहाँ 'तस्मिन्निति निर्दिष्टे पूर्वस्य' परिभाषा द्वारा 'पूर्वस्य' पद की उपस्थिति होती है। तदनुसार—यदि पूर्व वर्ण 'यण्' हो और पर वर्ण सम्प्रसारण हो तो पूर्व यण् को सम्प्रसारण नहीं होता।

उदाहरण—(१) युवन्+शस् (अस्), (व=उ सम्प्रसारण—'श्वयुव०', पूर्वरूप) यु उ न्+अस्, (उ+उ=ऊ—'दीर्घ')—यूनस् (य् को सम्प्रसारण की प्राप्ति, उसका 'न सम्प्रसारणे०' से निषेध, स्=र्=ः)=यूनः। (२) युवन्+भ्याम् ('न्' का लोप)= युवभ्याम् इत्यादि।

अर्वन् (=घोड़ा) शब्द के विशिष्ट रूपों का उल्लेख किया जा रहा है—(१) अर्वन्+सु (सुलोप, दीर्घ—'सर्वनामस्थाने०')—अर्वान् ('न्' का लोप—'नलोपः प्राति०')=अर्वा। (२) हे अर्वन्+सु ('स्' विभक्ति का लोप)=हे अर्वन्!

(३१४) पद—अर्वणः, तृ, असौ, अनञः। **विधिसूत्र।**

मूलार्थ—सु-भिन्न विभक्ति के पर रहते नञ् रहित अर्वन् शब्द को 'तृ' अन्तादेश होता है। अर्वन्तौ। अर्वन्तः। अर्वतः। अर्वद्भ्याम्।

विमर्श—यहाँ 'अङ्गस्य' का अधिकार है। वह अर्वन् का विशेषण है। इस प्रकार नञ् रहित अर्वन् अङ्ग के स्थान पर 'तृ' अन्तादेश होता है, किन्तु 'सु' परे रहते नहीं होता।

उदाहरण—(१) अर्वन्+औ, (न्=तृ (त)—'अर्वणः०') अर्वत+औ, ('नुम्'—'उगिदचाम्') अर्वन् त औ=अर्वन्तौ। (२) अर्वन्+जस् (अस्) (न्=त, नुम्)—अर्वन्तस् (स्=र्=ः)=अर्वन्तः। (३) अर्वन्+ङसि अथवा ङस् (अस्), (न्=त)—अर्वतस्

अर्वतः । अर्वद्भ्याम् । (३१५) पथिमथ्यृभुक्षामात् ७।१।८५ । एषामकारोऽन्तादेशः स्यात्सौ परे । (३१६) इतोऽत्सर्वनामस्थाने ७।१।८६ । पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने । (३१७) थो न्थः ७।१।८७ । पथिमथोस्थस्य न्थादेशः सर्वनाम-

---

(३१५) **पथिमथ्यृभुक्षामादिति ।** अत्र 'सावनडुहः' इत्यतः सावित्यनुवर्तते । 'अलोऽन्त्यस्ये'ति परिभाषयाऽन्त्यस्यादेशो भवतीति आह—**एषामिति ।**

(३१६) **इतोऽदिति ।** 'पथिमथ्यृभुक्षामि'त्यनुवर्तते । भाव्यमानत्वादेव सवर्णाग्राहकत्वे अदिति तपरकरणं स्पष्टार्थमेवेत्याह—**पथ्यादेरित्यादि ।**

(३१७) **थो न्थ इति ।** 'थः' इति षष्ठ्यन्तम् । आदेशेऽकार उच्चारणार्थः । पूर्वसूत्रात् पथिमथिग्रहणमनुवर्तते 'इतोऽत्सर्वनामस्थाने' इत्यतः 'सर्वनामस्थाने' इति च । तदाह—**पथिमथोरित्यादिना । पन्था इति ।** 'पथिन् + सु' इत्यत्र 'पथिमथ्यृभुक्षामात्' इत्यनेन आकारान्तादेशे, 'इतोऽत्सर्वनामस्थाने' इत्यनेन चेकारस्याकारादेशे 'पथ आ सु' इति जाते 'थो न्थः' इति थस्य न्थादेशे, सवर्णदीर्घे सस्य रुत्वे विसर्गे च कृते 'पन्थाः' इति रूपम् ।

(स्=रु=ः)=अर्वतः । (४) अर्वन्+भ्याम् (न्=त=द्—जश्त्व)=अर्वद्भ्याम् । शेष रूप 'मघवत्' शब्द की तरह बनेंगे ।

(३१५) पद—पथिमथ्यृभुक्षाम् , आत् । **अनुवृत्ति**—सौ । **विधिसूत्र ।**

मूलार्थ—सुविभक्ति पर रहते पथिन्, मथिन् और ऋभुक्षिन् शब्दों को आकार अन्तादेश होता है ।

विमर्श—सूत्रार्थ की पूर्ति के लिए—'सावनडुहः' (२८१) से 'सौ' पद की अनुवृत्ति आती है ।

(३१६) पद—इतः, अत्, सर्वनामस्थाने । **अनुवृत्ति**—पथिमथ्यृभुक्षाम् । **विधिसूत्र ।**

मूलार्थ—सर्वनामस्थान पर रहते पथिन् आदि शब्दों के इकार को अकार अन्तादेश होता है ।

विमर्श—यहाँ 'पथिमथ्यृभुक्षामात्' (३१५) से 'पथिमथ्यृभुक्षाम्' पद की अनुवृत्ति आ रही है । तदनुसार सर्वनामसंज्ञक विभक्तियों के परवर्ती होने की स्थिति में पथिन्, मथिन् तथा ऋभुक्षिन् शब्दों के इकार के स्थान में ह्रस्व अकार आदेश होता है ।

(३१७) पद—थः, न्थः । **अनुवृत्ति**—पथिमथोः, सर्वनामस्थाने । **विधिसूत्र ।**

मूलार्थ—सर्वनामस्थान पर रहते पथिन् और मथिन् के 'थ्' को 'न्थ्' आदेश होता है । पन्थाः । पन्थानौ । पन्थानः ।

विमर्श—यहाँ 'इतोऽत्सर्वनामस्थाने' (३१६) से 'सर्वनामस्थाने' तथा 'मथिमथ्यृभुक्षामात्' (३१५) से 'पथिमथोः' की अनुवृत्ति आती है । 'ऋभुक्षिन्' में 'थ्' न होने से उसकी अनुवृत्ति नहीं आती । इस प्रकार सर्वनामस्थानसंज्ञक विभक्तियों के पर रहने पर पथिन्, मथिन् के शब्दावयव 'थ्' के स्थान पर न्थ् आदेश होता है ।

